No. १८९४

Title गदाधरी टीकायां काशिकाख्यायां कृपाघटित लक्षणं

Author गदाधर

Extent ३४ Age ∝

Subject न्याय वैशेषिकं

नदा पद्दीटीकायां कात्रिकाख्यायां

कृत ग्वरितलद्दाणम्

१५९४

कूराघातिलक्षणं

ग॰टी॰ ॥श्रीगणेशाय नमः॥ साध्याभावे शंकायाश्च प्रतिबंधः कथं व्यभिचारज्ञानसामान्याभावकारणत्वमित्यत आह लिंगसंदेहः समानधर्मादिमत्ताग्र
१ हो वा शंकास्या मणौस्याह। मूले सा चेति सा व्यभिचारशंका। उपाधीति उपाधेस्तद्व्यभिचारस्य वा साध्यव्यभिचारव्याप्यतया लिंगसंशयविधया
साध्यव्यभिचारसंशयापादकत्वादिति भावः। व्याप्यस्य साधारणधर्मान्तर्भावमतेन दृष्टान्तमभिधानं। साधारणधर्मेति असाधारणधर्मादेरुपल
क्षणं। तद्विरहः तयोः व्यभिचारनिश्चयशंकयोर्विरहः। विपक्षबाधकतर्कादिति विपक्षो यात्यविपरीतज्ञानं व्याप्तिनिश्चयविरोधी व्यभिचार
ग्रहः तद्बाधकात् तत्प्रतिबंधकात्तर्कादित्यर्थः। संशयनिश्चयसाधारणतदापादकत्वान सामान्यं प्रतितदापादककापत्तित्वेन प्रतिबंधकत
या धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादिति तर्को व्यभिचारग्रहसामान्यप्रतिबंधक इति भावः। स्वतः सिद्ध एव स्वत एव सिद्धः प्रति
बंधकतर्केतरव्यभिचारज्ञानकारणविरहप्रयुक्तः सत्ताक इति यावत् स्वपदस्य स्वीयार्थकत्वात् एवकारस्य प्रागुक्तप्रतिबंधकव्यवच्छेदार्थकत्वा
त्। गादा· तर्कात् वह्निव्यभिचारित्वापादककवह्निजन्यत्वाभावापत्तेः। निवृत्तिः प्रतिबंधोऽनुत्पत्तिरिति यावत्। तर्कान्तरं वह्निव्यभिचारित्वं परि
वन्यजन्यत्वव्यभिचारि स्यात् वह्निजन्यवृत्तिः स्यादिति यावत्। तर्हि वन्यसमवहिताजन्यवृत्तिः स्यादिति तर्कान्तरं। इष्टापत्तिवारणाय वन्यसमव राम॰
हिताजन्यं वह्निनिष्ठान्यथासिद्धनिरूपकमुपादेयं तर्कान्तरं वह्निजन्यवृत्तित्वं परिवन्यसमवहिताजन्यवृत्तित्वव्यभिचारि स्यात्तर्हि स्वव्यभिचा १
रि स्यादित्याकारकं। अनवस्थितत्वपूर्ववधिणाहितं। आपाद्यव्यतिरेकनिर्णयजन्यतयानवस्थामाशंक्याक्षेपेऽनुक्तत्वात्तथाहीत्यादिना तत्परिहारा

संगतिः। आपाद्यापादकव्याप्तिनिश्चयविरोधिशंकानिवर्त्तकतर्कानवस्थायाः अग्रे समाधास्यमानत्वाभावाद्व्याप्तिमूलत्वेनेति शंकाया आ
संगतिरित्यादिपदं पूरयित्वा आचष्टे व्याप्त्यादिनिश्चयेति तथा चापाद्यव्यतिरेकनिर्णयविरोधिशंकानिरसनार्थं तर्कापेक्षणे एवानवस्थाया आ
दिपदेनाशंकनात्तत्परिहाररूपसमाधानस्य नासंगतिः। एतच्च प्रवृत्तिनिर्वाहानुरोधेनाप्युद्धिमारोप्येतीत्यभिहितं। एतादृशशंकास्थलेऽवच मूलशैथि
ल्यशंकानिवर्त्तकतर्कानवस्थापरिहारप्रकारस्याप्यूहितुं शक्यत्वात्तदनभिधानेऽपि न तच्छंकाया असंगतिः। यद्वा स्वतःसिद्धमूलशैथिल्यशं
काविरहस्थलं मनस्येवादिपदलभ्यानवस्थापरिहारः कृत इति। तर्कस्य व्याप्त्याद्यजन्यत्वान्निश्चयनिवेशः। मूलं न कारणं तर्कं प्रति आप्यादेः कार
णत्वात् किंतु प्रयोजकं तत्त्वं च विषयतासंबंधेन कारणतावच्छेदकतयेत्युक्तार्थलाभः। अनवस्थोद्धारे यत्र व्याघातेनेत्यादिरेव हेतुरिति पत इ
ति पूरणात् तत्र सर्वत्रैव तर्कस्य शंकानिवर्त्तकत्वात् व्याघातस्थलेऽपि तर्कावश्यकतया तर्कं विनेत्यसंगतमित्यतो यावदाशंकमित्यादिपावत्स्यः शं
काः तावंतस्तर्का इति तदर्थेन संगच्छते अवधेरित्यादिशंकानां तर्कानिवर्त्यत्वात् तन्निवर्त्यत्वेऽनवस्थातादवस्थ्यात् अतः शंकापदस्य तर्कमात्र
निवर्त्यशंकापरतया तथाविधसकलशंकाप्रत्तनिवर्त्तकतर्कस्वीकारादित्यर्थः। तथा च व्याप्त्यादिनिवर्त्यशंकायां तर्कास्वीकारोपादकं शंकाप्रतिबंधक्
पफलस्यान्यतः सिद्धत्वं यत्रेत्यादिना सूचनीयं तदुपपादकस्य तादृशफलस्य यत्रान्यतो नासिद्धिस्तत्रैव तर्कस्वीकाररूपो व्यतिरेकः तं स्फुटयितुं त
र्कमात्रनिवर्त्यत्वस्य विधेयत्वं स्फुटयति यत्रेति। यत्तर्कविरोधिन्य इत्यर्थः। तर्कान्यत इत्यादेस्तर्कभिन्नानुत्पादाप्रतियोगित्वमर्थः। तथा च तर्कविरो

ग॰टी॰ धिशंकात्वतर्कनिवर्त्यत्वयोः साहचर्यमात्रं न तु नियम इति भावः। अनयस्योद्धारे तर्कानुसरणादित्यंततो यथाश्रुतो न हेतुः न स्यानवस्थानुद्धार
२ कत्वान्नाप्येवकारार्थगर्भः तत्रैव तर्कस्वीकारस्य न तदनुद्धारकत्वात् किंतु तद्भिन्ने तद्स्वीकारस्य तस्य स्फुटतायैव यत्रैव स्यादित्यतो न तत् पौनरुक्त्यं।
ननु यत्रेति मूलमसंगतं पक्षस्य साध्यवधर्मिपरत्वादापाद्यापादककृपालाभेन कीदृशतर्के स्यादित्याक्षेपाकथंतायाः लाभात् तथाहीसाक्षिनाद्
2 पामिधानानुपपत्तेः। न च कस्मिन् तर्केइति कथं यत्रास्मिन् तर्केइत्युत्तरमितिवाच्यं। धर्मितोकथंताविरहेणतस्याहूपे एव पर्यवसानादित्यत आह
।यादृश तर्केइति। यत्र साधने व्याप्यातेन प्रतिबंधकवशेन शंकैव वह्निव्यभिचारित्वशंकैवना वतरति तत्रापि तत्र शंकानुदय इति यावत्। तत्र साध
नेतर्कं विना व्याप्त्यजन्यत्वापत्तिं विनैवेति न मूलार्थः क्वचित्स्वतःसिद्धस्य चेति पृथगभिधानेन तदन्यस्य लेशं कित्तानवस्थोद्धाराला भात्। यत्तु यत्न व्या
प्तिग्राहकतर्केशंकैव मूलशैथिल्यादिशंकैव तथा हीत्यस्य यथाहीत्यर्थः तथा च धूमोपदीत्यादिशंकाप्रतिबंधकमित्यं तस्य तादृशव्याप्यापादक
तर्कविरोधिन्यः शंकास्तर्कान्यनिवर्त्याः तथा व्याप्तिग्राहकतर्कविरोधिमूलशैथिल्यादिशंका इति भाव इति तन्न। भवन्मते तर्कविरोधिशंकात्वतर्कनि
वर्त्यत्वयोर्विरोधस्यैवलाभेन यावदाशंकामितिमूलासंगतेः। ननु यत्रेति नाधिकरणसप्तमीव्याघातप्रपञ्चकत्वविशिष्टस्य शंकानुत्पादस्य तत्रवा
भावात्। नापि सति सप्तमी तर्कभावानभिधानेन यस्य च भावेन भावलक्षणामित्यनुपपत्तिनाशप्तेः। न चोत्पन्ने उ[illegible]मानेइति चापूरणीयं तर्कपूर्व त्यथ
कालीनशंकोत्सारस्थले तर्कानपेक्षायाः अलाभेनानवस्थानुद्धारात् शंकानुत्पादस्य तर्कोत्पत्तिकालीनत्वस्य तदनंतरकालीनत्वस्य वालाभस्य चे २

पर्य्यञ्च इत्यतो गोबुधोऽस्मारणात्तु गत इति वस्तु सर्व्वकालीनस्वरूपेण सम्यगर्थज्ञानाय पूर्वप्रतिपत्तिरुत्पत्स्यमान इति। निर्गलितार्थमाह यावदिति तर्कात्पूर्व
मिति यावदर्थात्तर्कोत्पत्तिकालवृत्तिध्वंसप्रतियोगिकालवृत्तीत्यर्थः। अत्र व्याघातेनैव तद्विरोधिनी शंकानावतरतीति तर्कान्यस्य विरोधितयैव ताद
शशंकाविरह इति यावदिति पाठः। व्याघातः प्रतिबंधकता अनवस्थानुसारः तत्र प्रयुक्तस्वरूपतृतीयार्थान्वयः। तद्विरोधिनी तर्कविरोधिनी।
तर्कान्यस्येति पूरणं विरोधितयैवेत्येवकारेण तर्कविरोधितावच्छेदः। एतच्चाग्रिमवस्तुतस्तुकल्पाभिप्रायेण। इदानीं प्रवृत्तिव्याघातेन शं
कानवतारः कारणान्तराभावप्रयुक्तः सिध्यतीत्यर्थ इति पाठो व्याख्यायते। ननु व्याघातेन शंकैव नावतरतीति मूलमसंगतं व्याघातो परिप्रवृ
त्त्यभाववत्तदा धूमोद्देश्यकवह्निसमवधानसाध्यकप्रवृत्तेः शंकानुसादव्याप्यत्वेऽपि तदभावरूपव्याघातस्य तत्राप्रयोजकत्वादतो व्याचष्टे प्रवृत्तिव्या
घातेनेति प्रवृत्तिव्याघातो व्याहन्यमानानुपपद्यमानाप्रवृत्तिः तृतीया च नकारवहेतोपवृत्तेः शंकाविरहो न रकालीनत्वात् किन्तु तापकहेतावि
त्येतल्लाभाय सिध्यतीत्युक्तं। एतेन व्याघातः प्रवृत्त्यभावो वाच्यः तस्यापाद्यतया तल्लिंगकत्वं तदापादककत्वं वा न तृतीयार्थ इति सिध्यतीत्यसंगतं न
च तद्व्यतिरेकलिंगकत्वं तदर्थः विपर्ययानुमाने आपाद्यव्यतिरेकस्य लिंगत्वादिति वाच्यं। तादृशार्थे तृतीयानन्वयात्सन्नात् धूमाभावेन वह्निः सिध्य
तीत्यव्यवहाराच्चेति निरस्तं। वस्तुतो व्याघातः प्रवृत्त्यभावापत्तिरेव व्याघातस्तदभावापादकत्वमिसग्रे दर्शनात्। तस्याश्च विषयपरिशोधकत्वेन
प्रमाणोपकारकतया शंकारूपापादकव्यतान्ताज्ञाननिरासद्वारा शंकाविरहनिश्चयः फलमिति सिध्यन्त्वयि प्रयुक्तत्वं तृतीयार्थः एतदर्थमेव सि

ग०टी० ध्यतीत्युक्तंतेनस्वार्थानुमानप्रवृत्तोनिःशंकप्रवृत्तोनातीतमभिमाननिरासः।यत्तुव्याघातःप्रवृत्त्यभावापत्तिःजनकज्ञानविषयत्वशंकान्चयि
२ रतीत्यर्थः।नचधूमेनवह्निरित्यादौजन्यज्ञानविषयत्वंदृष्टंनत्विदमितिवाच्यं।दंडेनघटइत्यादौजन्यत्वमध्यवसायेनवसतीत्यादौजनकत्वंचे
तिवददोषात्।तत्र।तथासतितादृशशंकानवतारलाभेपिसिद्धिहेतुत्वकथनेनन्यूनतापातात्।तादृशार्थेतत्तीयानुशासनात्वअध्ययनप
3 दस्यतज्ज्ञानत्वास्पर्ष्टिकतयातत्रापिजन्यत्वस्यैवतदर्थत्वात्।शंकेवस्यैवकारस्यजगद्देवदुःखपंकमग्नमितिवदर्थोवार्यकइत्याशयेनाहशंका
नवतारइतिप्रयोजकाकांक्षावारणायक्वचिद्वह्निविनापीतिग्रंथसंगमनानुरोधेनतदुपादानप्रयुक्तत्वंविहायपूरयतिकारणेतराभावेति।
भावेनापिप्रयुक्तइत्यर्थः।एवंचाग्रिममूलेप्रतिबंधकमात्रोत्कीर्तनंसाधारणधर्मवत्ताज्ञानाद्यभावादेरुपलक्षणंकस्यप्रतिबंधकतयेतिचकारण
भावांतरतायाउपलक्षणमितिबोध्यं।तदुक्तंचपूर्वंवाटस्थेकेचित्तुइतिवर्तयंतीत्येतान्प्रांपुरितइतिनान्वयः।स्वक्रियाव्याघाताइत्यत्रस्वक्रियापद
स्योपादानपरत्वेनशंकाविरहस्यप्रतिबंधकमात्रप्रयुक्तत्ववर्तातांमतमाहकेचित्त्विति।उक्तस्वक्रियापदस्योपादानपरत्वंस्यानभिमतमित्यस्वरस
इतिदिक्।यत्रव्याघातेनेत्यादेरेवानवस्थाशंकानिरासपरत्वात्तन्त्रहेतुलाभायपतइतिपूरणमतोनानवस्थेतिनप्रकरणीयशंकाप्यनवस्था
पदमनुवर्त्तनकारणेजनानात्तस्मात्तन्त्रसामान्यतःतर्कविनेत्यत्रागतशंकानिवर्तकतर्कासत्त्वेऽपितन्निवर्तकतर्कसत्त्वादतःतर्कांतरंविनेत्यर्थः टीम०
।तत्रतादृशतर्के।उत्पत्स्यमानेइतिचावश्यकंसतिसप्तमीदर्शनात्संभवतीतिशेषः।व्याप्तिग्रहोव्याप्त्यादिनिश्चयप्रयुक्तोनन्यूनत्वमित्याशयेन २

व्याचष्टे तर्कोत्तरमिति। एवं चादिपदग्राह्योपायव्यतिरेकनिर्णयस्थलीमानवस्थोद्धारी सापायापादकस्यादिनिश्चयस्थलीमानवस्था
यांकानिरासप्रकारस्तु कुशाग्रधिषणैः स्वयमेवोहितुं शक्यतया न तदनभिधानप्रयुक्तन्यूनतेति बोध्यं। तेषां तादृशशंकाविशेषाणां। दुष्ट च-
ह्वेति दृष्टापन्निशंकावारणाय। वृद्धेरिति। सामान्यतोऽन्वयव्यतिरेकग्रहादपि तर्केणाप्रतिबंधकीभूतकारणत्वशंकोच्छेदे वह्नित्वादिविशेषध
र्मान्तर्भावेण कारणतानिश्चयः संभवतीति भावः। अत्र च प्रकृते कार्यकारणभावग्रहार्थं धूमनिष्ठवह्निमात्रघटितान्वयव्यतिरेकानुविधाप्यन्वय
व्यतिरेकप्रतियोगित्वस्य वह्नित्वसामानाधिकरण्येन निश्चयोपगमेन तस्य धूमाकारणत्वव्यावर्त्तकतया वह्नित्वावच्छेदेन तत्कारेहासंभवान्मौलत
र्कवैयर्थ्यं एवं तस्य धूमसमानाधिकरणाभावप्रतियोगित्वरूपव्यभिचारव्यावर्त्तकतया तन्निश्चयादेव व्याप्तिनिश्चयसंभवादपि तद्वैयर्थ्यमित्यतोन्याह
ग्रामन्वयव्यतिरेकग्रहं दीधितिकारो दर्शितवान् तस्य च न व्यभिचारव्यावर्त्तकता। नापि तदूहोऽकारणत्वशंकाविरोधी धर्मितावच्छेदकभेदाद्विशे
षदर्शनानात्मकत्वाच्च। एवं चोक्तग्रानरासभादिपदार्थस्यान्वयव्यतिरेकयोरन्वयव्यतिरेको धूमस्योपलभमानो वह्नेः कारणत्वमेव निश्चिनुतेऽइ
तियोजना। तत्रोपलभमान इति वर्त्तमानसमीपेऽतीतेऽहेतौ लक्षणहेत्वोः क्रियायाः इति इति सूत्रविहितेन शानचा तत्समुदायधर्मिकान्वयव्यतिरेक
ग्रहस्य कारणतानिश्चयहेतुत्वलाभः। यद्यप्यनेनोक्तसमुदायत्वावच्छेदेनान्वयव्यतिरेकित्वं दुर्ग्रहं रासभव्यभिचारदर्शनसंभवात् तथापि धूमत्वसा
मानाधिकरण्येन तदूहो द्रष्टव्यः। ननु कारणत्वशंकावन्न्यजन्यत्वशंकेति कल्पे किमर्थमुक्तसमुदायत्वावच्छिन्नेऽन्वयव्यतिरेकग्रहः। वह्निमा

ग.टी. त्रान्वयव्यतिरेकस्यैनान्तरीयकवह्निकसाधारणतया वन्ह्यजन्यत्वाभावावर्त्तकत्वेन धूमे तन्निश्चयस्य तच्छंकानिवर्त्तकत्वासंभवेन तर्कसार्थ
४ क्यसंभवात् । न चान्यथासिद्धनिरूपकत्वसहितस्य तस्य वन्ह्यजन्यत्वव्यावर्त्तकत्वमिति वाच्यं । तथापि तत्तद्धूमत्वावच्छेदेन तद्ग्रहजनकसामग्र्या
तर्कं विना धूमत्वावच्छेदेन वह्निजन्यताग्रहानुपपत्तेस्तर्कसार्थक्यादिति चेन्न । धूमत्वसामानाधिकरण्येन वह्निमात्रान्वयव्यतिरेकानुविधानबोधसत्वेव
ह्निजन्यत्वसंशयसत्वेपि वह्निव्यभिचारादर्शनासंभवेन वह्निव्यभिचारिधूमाकल्पनलाघवप्रतिसंधानेन च तदवच्छेदेन वह्निजन्यतानिश्चयात्तर्कवै
फल्यादिति एतच्चरासभपदोपादानं प्रथमप्रयोजनदीसादर्शितं । वस्तुतस्तूपाध्यायमतपोषकग्रंथरीत्या निर्वाहितायां उक्तशंकायाः समाधानार्थं
वस्तुतस्त्वित्यादिकमनुपदमेव वक्ष्यतीति । संभव इति तादृशसमुदायत्वसामानाधिकरण्येनैवापंग्रहः नतु तदवच्छेदेन धूमांतरोत्पत्त्यधिक
रणे तादृशसमुदायविरहशंकाया दुरुच्छेदात् । तादृशेति तदवच्छेदेनाकारणत्वसंशयस्तु न तद्विरोधिनः समुदायत्वसामानाधिकरण्ये
नान्वयव्यतिरेकग्रहस्य सत्वादपि काशोऽकिंचित्करत्वार्थः । बाधनिर्णयाभावसंपादनायाह तत्समुदायेति । व्यभिचारोऽकार्यत्वं । तर्कवैयर्थ्य
मिति तर्कमौलः । धूमो यदि वह्निव्यभिचारी स्यात्तदाकारणमात्रसमुदायजन्यो न स्यादिति तर्कत एव व्याप्तिनिश्चयसंभवात् । वस्तुतस्तु तत्स
मुदायत्वावच्छेदेन जनकताग्रहविशिष्टस्य तादृशसमुदायत्वावान्वह्निरिति ज्ञानस्य वह्नौ धूमाकारणतासंशयविरोधिनः संभवात् अत एव एम०
विशेषदर्शिनामित्यग्रिमग्रंथसंगतिः अन्यथाकारणमात्रघटितसमुदायजन्यताज्ञानस्य भ्रमत्वादिदोषादर्शिनामपि तदभावापत्तेरिष्टा ४

पत्तिरूपतया तर्कसाध्यस्य तदनुधावनासंगतेः। रासभयदेति तथा च रासभवृत्तिसमुदायव्यभिचारदर्शनसंभवात् तद्वृत्तिसमुदायेऽन्व
यादिदर्शनेन तत्समुदायत्वावच्छेदेन कारणतानिश्चयं लंभयतीति तर्कस्याफल्यंतीध्यं। एवमपि रासभवृत्तितद्व्यभिचारानुपस्थितिदशा
यां न दर्शनासंभवात् तत्समुदायत्वावच्छेदेन कारणतानिश्चयसंभवात् तर्कवैयर्थ्यशंका तेयघपीति। विशेषदर्शिनां धूमे रासभवृत्तितत्समु
दायव्यभिचारनिश्चयवतां न तु तत्समुदायाव्यभिचारनिश्चयवतां। तत्र समुदाये कारणतानिश्चयस्यावश्यकत्वात्। नन्वेतादृशरीत्या रास
भयदोपादानप्रयोजनवर्णनं न सम्यक्। तद्धूमत्वावच्छेदेन वह्न्यन्वयाद्यनुविधायित्वज्ञानस्यैव लाघववत्तानवशेन धूमत्वावच्छेदेन वह्निजन्य
ताग्राहकत्वसंभवात् तर्कवैयर्थ्यमाशंक्य तर्कस्यैवानन्यथासिद्धत्वघटितकार्यकारणभावकल्पनायां लाघवज्ञानं सहकारीति महताप्रबंधे
न वक्तव्यं तथा प्रकृते तर्काभावे लाघवमात्रेण कारणमात्रसमुदायत्वावच्छेदेन तादृशकार्यकारणभावकल्पनापादुर्घटत्वात् कारणताग्राह
कतर्कापेक्षावश्यंभावादिति चेत्सत्यं। अतिरिक्तजन्यतापक्ष एवैतस्य योजनसंगतेः। अथवा तादृशान्वयव्यतिरेकित्वप्रतियोगित्वमात्रजनकता। सा
मानाधिकरण्येन तद्ग्रहो जायमानो लाघवज्ञानवशादवच्छेदकावच्छेदेन जायत इत्यर्थः। एवं च व्यभिचारपदं यथाश्रुतार्थकमेवेति। अस्तु वा समु
दायत्वावच्छेदेनानन्यथासिद्धत्वघटितकार्यकारणभावग्राहकतर्कः परं तु वह्नित्वावच्छेदेन जनकताग्राहकमौलतर्कवैयर्थ्यमिति यथाश्रुतमेव स
म्यक्। नन्वेतादृशरीत्या रासभयं दसार्थकावर्त्तनमसंगतं तादृशसमुदायत्ववत्तानाद्यसत्वे तर्कसाध्यस्यासंभवात् एवमवपमितादिग्रंथः

संशयेपि कारणत्वरूपकोटिभाने तादृशान्वयादिग्रह आवश्यकः अन्यथा विपरीतकोटिभानप्रतिबंधकसत्वे

ग॰ टी॰ धूमसामग्री एतत्समुदायांतर्गतैवेत्यवधारणपरतया व्याख्येयः तत्र सामान्यतोऽन्वयादिग्रहस्य नोपयोगः तत्क्वचित्कथं धूमकारणताग्रहः तदा

५ नीमन्वयादिग्रहस्य विनाशप्राप्ता एवमवधारणस्यानुपपत्तमत्वावच्छेदेन कारणत्वावगाहित्वभ्रमस्युदासार्थं संदिग्धे इतीत्यप्यसंगतमेव तदनुक्ताव

पि तस्य वह्नेर्धूमकारणतासंदेहप्राक्कनतया विशेषादर्शनरूपत्वस्यावश्यकत्वात् एवमवधारणस्य रासभादावकारणत्वनिश्चयस्य च प्रदर्शनं

व्यर्थमित्यतः अन्वयादिग्रहविषयसमुदायानंतर्गते तदंतर्गते च धूमाकारणत्वसंशयो निरसनीयः तदुभयस्य पारिभाषिकाजन्यतानिश्चयवि

घटकत्वादिति तन्निराकरणतयातयोः तर्कोपयोगित्वं वदन्नेव कृतादृशानेत्यादिसंदिग्धेइत्यंतग्रंथं व्याचष्टे वस्तुतस्त्विति। [illegible]

कारणतानिश्चयानुपपत्तेरिति दृशायामित्यंतं कारणत्वग्रहे इति अयं समुदायत्वधर्मितावच्छेदकः तथैव संदिग्धइत्यादिग्रंथव्याख्यानात् केवलरा

सभत्वधर्मितावच्छेदकस्य धूमकारणतासंदेहस्याग्रे प्रदर्शनीयः समुदायधर्मिकस्यापि तादृशाजन्यतानिश्चयविघटकत्वमस्यत्वं संदिग्धेइति

संदेहो न विवक्षितः किंतु ज्ञानमात्रमित्यावेदनाय ग्रहपदं। आशंकापर इति सामान्यतोन्वयादिग्रहात्तर्केसंशयेपि कारणत्वरूपकोटिभाने तादृशा(

न्वयादिग्रह आवश्यकः अन्यथा विपरीतकोटिभानप्रतिबंधकसत्वेनाकारणत्वशंकोच्छेदे वह्नेर्धूमकारणतानिश्चयो नोपगंतुं शक्यो अवधा ने

रणमहिम्ना सामान्यानंतर्गते धूमकारणतासंदेहेपि तत एव तादृशसमुदायांतर्गतरासभे तत्संदेहः स्यादित्याशंकापर इत्यर्थः। संदिग्धेइत्य राम॰

स्य संदेहवान् स्यादित्यर्थः तु आशंकालाभः इति चेन्नेत्यायनमिधानात् परपदं पारिभाषिकजन्यतानिश्चयविघटनाभिधानं च तादृशसंदेहस्यानिष्टत्व ५

भायएतद्देवचाग्रेपुनःप्रपंचनीयं। अवधार्येनिचधूमकारणत्वं तद्भाववत्समानाधिकरणान्यतमत्ववान् एतद्भावोवह्निश्चेतिकारणस्यापिसूचकं।
यस्यचेतिनचसमुदायधर्मिकतत्संदेहोनप्रतिबंधः धर्मितावच्छेदकभेदादितिवाच्यं। अवच्छेदकावच्छेदेननिश्चयप्रतिबंधतावच्छेदककोे
टौधर्मितावच्छेदकतापर्याप्त्यप्रवेशाद्वृत्त्यादिविशिष्टरासभत्वमितिव्यासज्यवृत्तिरासभत्वघटितधर्मपुरस्कारेणसंशयस्यापिसमशीलतयाप्रतिब
ध्यत्वात्। तर्केतिअवधार्येत्यंतमनुवर्ततेइतिनन्यूनतारासभपदोपादानंसंगमयतितथाचेति। संभवायपदंजनाय। अकारणमनंतर्भाव्यकारण
मात्रसमुदायान्वयादिग्रहस्थलेऽकारणेकारणत्वग्रहणांकेवनावतरेदितितद्वतारायरासभपदोपादानमित्यर्थः। अकारणताग्रहेति। व्यति
रेकव्यभिचारइतिपाठेतुउक्तसंपादनप्रकारोबोध्यः। अथाकारणमनंतर्भाव्यकारणमात्रान्वयादिग्रहोक्तावपितत्समुदायानंतर्गततयारासभेव
त्वेतरवद्धूमकारणतासंदेहस्यावधारणेनैवनिवृत्तिसंभवाद्रासभपदोपादानंव्यर्थमितिचेन्नतिथासतिवह्नेर्धूमाकारणत्वसंदेहासंभवात्तर्क
वैयर्थ्यापत्तेः। ननुसामान्यतोऽन्वयादिग्रहोत्तरस्यावधारणस्यनान्यतमत्वावच्छेदेनकारणतावगाहित्वमकारणंतर्भावात्नापितत्सामानाधिक
त्पेनतथापितर्के अनुयोगात्। नचतस्यधूमोपादिवह्निव्यभिचारीस्यात्तदुक्तसमुदायवृत्तिकारणताकोनस्यादितितर्काशंकापरत्वमितिवाच्यं। तस्य
रासभजन्येवह्निव्यभिचारित्वामूलशैथिल्यापादनतउद्देश्यविधेयभावव्यत्यासेनधूमकारणंधूमसामग्रीएतेषामन्यतमंपर्याप्त्यघटितसंबंधेनदृता
शनरासभादिसमुदायत्ववतीएतत्सर्वंकारणंधूमस्येत्यनभिधानात् इत्यभिप्रेत्याहधूमसामग्रीतिएवकारोवत्त्वंतरेसमुदायानंतर्गतत्वलाभा

ग०टी० र्थः। तथा च तदर्थः। तथा च तादृशसमुदायत्वं धूमसामग्रीत्वव्यापकं तदभाववच्चवत्त्वं तद्भिन्नत्वादिरर्थः। तादृशसमुदायत्वेन तत्संबंधेनाव्यापक-
६ ताक्षोदक्षमव्याप्यपदं। तथा सति सामानाधिकरण्येन कारणत्वस्यावधारितत्वादिति ग्रंथसंगतिः। कारणत्वे समुदायत्वव्यापकत्वानवगाहित्वेता-
6 त्पर्यात्। तद्धर्मव्यापकताविशिष्टस्वरूपादिसंबंधेन तज्ज्ञानाज्ञानविशिष्टतदभाववज्ज्ञानाज्ञानस्थापितद्धर्मव्यापकताविशिष्टतदभाववज्ज्ञानाज्ञानवत्तद्धर्म-
वज्ज्ञानाज्ञानविरोधित्वं सकलजनसिद्धं। पक्षे किंचित्कारणताव्याप्यावर्त्तकदर्शनेपि कारणत्वानत्वसंशयसंभवात् सामग्रीपदं कारणतासामान्यलाभार्थं।
वस्तुतस्तु तत्समुदायांतर्गतधूमकारणं मेतत्समुदायानंतर्गतं च न धूमकारणमित्येवावधारणं कारणत्वसामान्याभावसूचकं च सामग्रीपदं। ए-
वं चाव्यर्थपदैवकारार्थयोर्नैरर्थक्यशंकापत्ततः समानार्थत्वात् एवकारस्य विशेष्यसंगततः न तूद्देश्यविधेयभावव्यत्यास इति। अवधारणं वैयर्थ्य-
विधूनयति एतदिति तत्समुदाये ति। तथा च तस्मात्प्रायव्यतिरेकनिर्णयविरोधितत्संशयजनकीभूतविशेषणसंशयापादकत्वेनोच्छेद्यतया व्यापका-
भाववज्ज्ञानाज्ञानादिविधयावधारणोपयोग इति अत्र सामान्यतोऽन्वयादिग्रहादवधारणं तत्समादेः कारणत्वाभावनिश्चयः श्रुततो वह्निर्धूमकार-
णं न वेति संदेहाद्यव्यतिरेकग्रहोऽसामान्यतोऽन्वयादिग्रहस्य मतस्तर्कः तर्क एव वान्वयादिग्रहरूपः तादृशान्वयाद्युपलंभसहकारितोऽका-
रणत्वसंदेहस्योच्छेदायेतत्तर्काभिधानादिति बोध्यं। अत्रावह्नेरित्यादिशंकाहृदयविरोधिनस्तद्रुपादानस्यमूलेत्रदर्शनेपि तृतीयशंकाविरोध- राम०
प्रदर्शने न्यूनतास्पादतोऽवधारणपूरितमिति यथाश्रुतमूलानुरोधिनां मतमाह केचिदिति धूमेऽहेतुकत्वशंका किंचिद्रूपेण नैयत्यादिशंके ६

त्यन्यतमत्वात्मकसामान्यरूपानुधावनमित्यभिमानः। कादाचित्कत्वं च प्रागभावाव्यत्वे सति कालत्वाव्याप्यकाधिकरणताकत्वं। ध्वोत्पत्तिस्मरणो
त्पत्तिकध्वंसप्रतियोगिकालावृत्तित्वमिति केचित्। सकारणकत्वमात्रनिष्ठपक्षेप्येवं तच्छंकाविरोधितया कारणतया युक्तसमुदायनिष्ठत्वेपि यथा
दित्यर्थः वस्तुतस्तु भेदे तृतीयपाकादाचित्कत्वरूपसकारणकत्वे त्यर्थः कादाचित्कत्वं चोत्पत्तिमत्त्वं तथा च वक्ष्यति न हेतुमत्त्वनिमित्तादन्यता दृशशंका
विरोधिरूपं संभवतीति। उक्तानाशनाशसभाद्यन्यतमकारणकत्वं च सार्वव्यवहितं प्राक्कालवृत्तित्वमिति तद्धटकोत्पत्तिमत्त्वमात्रमादाय पर्यंतपदोपादान
संगतिरिति। वस्तुतस्तु यद्यप्यत्र यदि हि गृहीतान्वयव्यतिरेकहेतुं विनेति मूलस्य हेतुपदस्य हेतुत्वेन निश्चितेत्यर्थो तदा श्रित्यसामान्यतोऽन्वयव्य
तिरेकग्रहविषयाणां हेतुत्वावधारणस्य मूललभ्यत्वं तु वचं तस्येव च तृतीयशंकानिरासकत्वेन मूलेपि न न्यूनता तथापि उपादानपदार्थस्येव ग्रह
पदार्थत्वमुपगम्य हेतुपदं यथाश्रुतार्थकमिति तृतीयशंकाविरासं संपादनाय अहेतुक एवेति शंकामध्याहृत्य यदि हीत्यादिग्रंथो व्याख्येतव्यः
एवं च उक्तानाशनाशसभाद्यन्यतमकारणकत्वज्ञानं तृतीयशंकाविरोधीत्येवत्वानभिमतमिति अन्यतमांशापेक्षा दूषणतामंशपादूषितं यदि तृतीयशंकावि
रोधिनं प्रदर्शयेत्तदा सकारणकत्वज्ञानमात्रेण स्यात्तादृशशंकाविरोधिनो नेदं प्रदर्शनमित्येवोपेयमिति अस्माकं च धूमे उक्तानाशनाशसभाद्यन्यतममा
त्रकारणकत्वस्यावधारणस्य प्रकारांतरेणोपयोगितयैव दीधितौ तदुत्कीर्तनमिति न विरोधः॥ सामानाधिकरण्यमात्रेण। उक्तसमुदायत्वसामानाधि
करण्यमात्रेण। अवच्छेदकावच्छेदेनान्यतरकोटयवगाहितानं संशयइतिसिद्धांतादितिभावः। नन्वेवं सामानाधिकरण्यमात्रेणाभावकोटिरेवभासताम

ग॰टी॰ भावकोटेस्तु तदवच्छेदेन भानादेव संशयत्वनिर्वाहादित्यत आह समानेति। अवधारितत्वादिति अवश्यमेतेषामन्यतमं कारणं धूमस्येति तदवधा
७ रणस्योक्तत्वादित्यर्थः। धूमसामग्रीत्वरूपधूमकारणत्वस्य तद्विषयत्वादिति भावः। नन्वेतावता कोटिद्वयोपदर्शनात्कानिचिन्नयेतित्यर्थो। नच पू
र्वावधारणस्य सामानाधिकरण्यमात्रावगाहित्वात्ताभार्थ्यं तदिति वाच्यं। तस्यावच्छेदकत्वानवगाहित्वस्य तदुत्तरसंशयादेव लाभादित्यत आ
ह समानेति। न विरोधीति अन्यथा तादृशैककोटिविषयताया तादृशापरकोटिविषयताविरहप्रयोजकतायाः साकार्यकाले पि सामानाधिकरण्ये
न तदुभयकोट्युल्लेखानापत्तेः तथा च समुच्चयात्मनः संशयस्य प्रदर्शनं पूर्वावधारणस्याप्रतिबंधकत्वे कथं तानि तत्त्वार्थमिति भावः स्वयं संदिग्धेइति संशयः
शंकनीयतामात्रेणाभिहितइत्युक्तं येन तत्संदेहसद्भावं वदंति तन्मतमाह केचित्त्विति। धूमेति व्यापकत्वस्य प्रकारांशे भानमभिप्रेत्य। ननु तत्समुदा
यत्वस्य साधारणधर्मतया तज्ज्ञानमात्रादेव वह्निर्धूमजनको न वेति संशयसंभवादेतत्संशये वैयर्थ्यमित्यत आह। अयं चेति उक्तसमुदायत्वावच्छेदे
न धूमकारणत्वं तत्सामानाधिकरण्येन तदभावं चावगाहमानस्येत्यर्थः। न्यूनवृत्तिताकोटिको वाप्यर्थः। इति प्रदर्शितइत्यनेनान्वयः। तादृशेति धूम
कारणत्वतदभावसहचरितान्यतमत्ववान्वह्निरिति निश्चयविशिष्टस्यान्यतमत्वावच्छेदेन धूमकारणत्वावधारणस्य व्यावर्त्तकधर्मदर्शनविधया रम॰
प्रतिबंधकत्वाद्वह्निर्धूमजनको न वेति संशय एव न संभवेदिति तर्क एवं विफलः स्यादिति समुदायधर्मिकसंशयो दर्शितः तथा च प्रकृते तादृशसं ७
शयानुरोधेन व्यापकत्वरूपावच्छेदकत्वानवगाहीतत्सामानाधिकरण्येनैव कारणत्वग्रहो लभ्यते तस्य चाव्यावर्त्तकधर्मदर्शनत्वाभावेन तत्संश

धोपपत्तिरिति भावः। अत्र च न केवलं संशयानुरोधात्तत्तथाकारणतानिश्चयोऽपि त्वकारणतांतर्भावादप्रतीतिप्रागुक्तं स्मर्त्तव्यं। इत्याहुरिति पा
ठः। अव्यापकत्वप्रकारकसंशये व्यापकत्वसंसर्गकज्ञानस्याविरोधितया संशयानुरोधविरहः प्रकारांतरेणावधारणस्य सामानाधिकरण्या
वगाहित्वलाभात्संदेहप्रदर्शनवैयर्थ्यं चास्वरसबीजं। परे तु एतत्समुदायवृत्तिकारणतात्वं एतत्समुदायत्वावच्छेद्यं न वेति संशयः। ननूक्तसं
शयस्य स्वरूपसंबंधरूपावच्छेदकतानिरूपितावच्छेद्यतावगाहित्वे तत्संशयं प्रति अन्यतमपदवृत्तिकारणतायामन्यतमत्वनिरूपितव्यापकत्वाव
गाहित्वेनाप्रतिबंधकत्वात्तदनुरोधेनान्यतमत्वसामानाधिकरण्येन कारणतावगाहित्वोपवर्णनमसंगतं तथा चान्यतमं कारणं धूमस्येति व्या
वर्त्तकधर्मदर्शनस्य प्रतिबंधकस्य सत्त्वात्कथं वह्निजन्यत्वसंशयः स्यात् तदभावे च वन्यसमवहितेत्स्यादितर्कानुसरणमर्थमिति चेन्न। दंडो घटका
रणमित्याद्यवच्छेदकावच्छेदेन कारणताभाने स्वरूपसंबंधरूपावच्छेद्यत्वमपि नतु सामानाधिकरण्येन तद्भाने इति सिद्धांतः तथा च प्रकृते तादृश
संशयानुरोधेन स्वरूपसंबंधरूपावच्छेद्यत्वानवगाहि अन्यतमत्वसामानाधिकरण्येनैव कारणताग्रहो वक्तव्यः तस्य च व्यावर्त्तकधर्मदर्शनत्वाभा
वेन संशयनिरासार्थं तर्कानुसरणे वैयर्थ्याभावादिति वदंति एवं क्रमेण सामान्यतोऽन्वयव्यतिरेकग्रहात्तर्केण रासभादावकारणत्वशंकोच्छेदेन
।व्यक्तिविशेष इति। नन्वेतादृशोऽवन्यसमवहितजन्यत्वनिश्चयः कीदृशापत्त्योपपद्यते अवच्छेदकावच्छेदेनेति चेत् धूमसामान्यपक्षकतर्क
स्यासंभवादित्युक्तिविरोधात्। सामानाधिकरण्येनेति चेत् तस्य विरोध्यविषयकत्वेनाजनकत्वादिति चेन्न। व्यक्तिविशेषे तर्कस्य सत्त्वे न सामाना

ग०टी०
८
8

धिकरणेनापत्तिर्वा मा तत् धूमत्वावच्छेदेन तन्निश्चयस्याभिप्रेतत्वात् तद्दोषविरहादेव तद्विरोधिवन्ह्यसमवहितजन्यत्वशंकानुदयसेवनाद्रास
भासमवहितजन्यत्वशंकानुदयस्यवक्तव्यत्वात् । धूमत्वसामानाधिकरण्येनेति धूमत्वावच्छेदेनेत्यर्थः ॥ ननु सामान्यतः सामानाधिकरण्ये
नान्वयव्यतिरेकग्रहाद्धूमत्वसामानाधिकरण्येनैव रासभजन्यत्वं गृहीतुं शक्यते न तु तदवच्छेदेनेत्यत आह धूमत्वसामानाधिकरण्येनेति । वक्ष्य
माणरीत्यापाद्यमापादकज्ञानं यादृशीमापत्तिं जनयति तादृशापत्तिस्तादृशापादकज्ञानं प्रतिहन्तीति न्यायेन तथा च सामानाधिकरण्येनाप
त्तेरापादकशंकासामान्यविधूननद्वाराऽवच्छेदकावच्छेदेन कार्यकारणभावनिश्चयः फलमिति भावः । नन्वत्र सामानाधिकरण्येनापत्तिरेव रास
भादेर्धूमकारणतानिश्चयापादकत्वेनाभिहिता न त्ववच्छेदकावच्छेदेनेति कुत इत्याशंक्याह धूमत्वेति । असंभवादिति धूमोपदीर्घयानभि
प्रेतत्वादित्यर्थः । धूमत्वसामानाधिकरण्येनैव वन्ह्यसमवहिताजन्यत्वनिर्णयोऽवच्छेदकावच्छेदेनापत्तावपेक्षणीयः तथा सति क्वचिद्वह्निं विना
पि भविष्यतीति शंकायास्तर्कविरोधित्वाभिधानासंगतिरतस्तादृशापत्तेस्तद्रूपाभिप्रेतत्वं न संभवतीति भावः । अत्र दुर्निश्चयत्वमेत्यंतः अपेक्षणी
ये धूमत्वसामानाधिकरण्येनैव वन्ह्यसमवहिताजन्यत्वनिर्णये अध्याहृते हेतुः । दोषस्थले धूमत्वसामानाधिकरण्येन वन्ह्यसमवहितजन्यत्व रास०
शंकासंभवाद्दुर्निश्चयत्वं बोध्यं । यद्वा धूमत्वावच्छेदेन वह्निजन्यताग्राहकस्येति योजना । सामानाधिकरण्येन वन्ह्यसमवहिताजन्यत्वनिश्चयस्यमू ८
लानभिप्रेतत्वेत्यर्थः । तेन दुर्निश्चयत्वेत्यंतेन स्वरूपकीर्त्तनमिति एवं च रासभादेर्धूमकारणतानिश्चयापादकत्वमवच्छेदकावच्छेदेनापत्तेर्मौलि

रीति विरुद्धतया नाशङ्कापि तु शङ्कामिति परिस्पष्टमिति भावः। वस्तुतस्तु वह्नेरित्यादि शंकयोरवच्छेदकावच्छेदेन तत्कोटिकत्वेन व्याप्यासमानता
द्धूमत्वसामानाधिकरण्येन वह्न्यसमवहितताजन्यत्वनिर्णयादवच्छेदकावच्छेदेनापत्तिस्तस्याश्च सामानाधिकरण्येनापादकशंकानिवर्तकत्वा
भावेपि अपेक्षणीयां तद्बलादेवावच्छेदकावच्छेदेन कार्यकारणभावग्रहदृढितिदीधितिकारः प्रदर्शनीयमूलाभिप्रायेणोदां वक्ष्यमाणरीत्येति अ
पेक्षणीयां तद्रक्षहवारेणेत्यर्थः। न तु सामानाधिकरण्येनापत्तिः रासभादेर्धूमकारणतानिश्चयापादकत्वेन कुतो नाभिहितेत्याशंकायामाह धू
मत्वावच्छेदेनेति एवं च धूमसामान्यपक्षकतर्कस्यासंभवादित्यस्य धूमत्वसामानाधिकरण्येनापत्तेर्मूलतात्पर्यागोचरत्वादित्यर्थो बोध्यः। ईदृशापत्ति
र्वेद्या तत्र चेत्यादिग्रंथावतारं निराकर्तुमप्रमसाधारणपारिभाषिकजन्यताज्ञानमेव तर्कनिर्वाहकं तच्च तदभावाग्रहात्सुघटमित्यभिमानं निराक
रोतीत्याह यदि चेति। वह्नीति व्यतिरेकदृष्टान्तः वह्न्यसमवहितताजन्ये इति शेषः। तद्व्यापारेतरेति रासभतद्व्यापारेतरेत्यर्थः। तादृशधूमे वह्निघटितस
मुदायस्यानन्त्याधिकरणादेशावच्छिन्ने रासभाभाववत्त्वसत्ताच्चनितसंभवः। रासभसमवधानकाले तदुत्तरं वा वह्निसमवधानात्। वह्निसमवधानो
त्तरं रासभसमवधानस्थले तु तत्क्षणे निखिलकारणसत्त्वेन धूमोत्पत्तौ बाधकाभावेन तत्रत्याधिकरणदेशावच्छिन्ने रासभाभाववत्त्वाव्यवहि
तप्राक्क्षणकत्वमेव न तु तदभाववत्त्वावेदनापरासभाद्यसमवहितताजन्ये इत्युक्तं। भ्रमात्मकाद्यव्यतिरेकनिर्णयस्थलेऽप्यापाद्यस्याबाधितत्वे
पेक्षापत्तिरूपत्वमित्यभ्रान्तानामित्युक्तं। अकारणे चेत्तर्कोऽवतरेत्तदाऽकारणत्वसंशयं निवर्त्यकारणत्वनिश्चयप्रसंग इत्यहेतुत्वनिश्चयोऽ

ग॰टी॰ पेक्षणीयः स्यात् न त्वेवमिति तन्निश्चयोपदर्शनेऽप्यर्थमिति भावः। कथंचिदकारणत्वशंकाविरहे सामान्यव्यभिचारनिर्णय एव कारणत्वनिश्च
९ यवारकः। स च यस्य यद्व्यतिरेकेऽपि सत्त्वं नैनोक्त इत्यपि निरुक्तरीति अत एवेति। एकधूमे रासभासमवहितजन्यत्वपारिभाषिकरासभघटितज
9 न्यत्वयोरसत्त्वादेवेत्यर्थः। तर्कासंभवेनाकारणत्वशंकापादुर्वारत्वादिति शेषः। तद्धूमत्वेति अन्यथा सामान्यधर्मावच्छिन्नकारणताग्रहप्रतिबंध
कसामान्यव्यभिचारनिर्णयसंभवे विशिष्टधर्मावच्छिन्नकार्यकारणभावग्रहो दुर्वारः स्यात् तद्धूमे रासभव्यभिचारासत्त्वादिति भावः। तेषां अकारणा
नां रासभादीनां। पञ्चरासभासमवहितजन्यत्वविशिष्टरासभसमवहितजन्यत्वयोः सत्त्वाभावापादकतामते रासभसमवहितजन्यत्वं सि
ध्यतीति तन्नाशतावता रासभजन्यत्वासिद्धेः नांतरीयकरासभसमवहितजन्यत्वसंभवात्। अहेतुत्वनिश्चयस्य प्रकृततर्कोपयोगितां दर्शयितुं वह्नि
घटितपारिभाषिकजन्यतासत्त्वेपि वस्तुतस्त्वित्यादिना पूर्वोक्तं वह्निजन्यताग्राहकतर्कानवतारबीजभूतं तन्निश्चयासंभवं स्मारयति वह्नीत्यादि।
रासभस्य धूमकारणतासंदेहे वह्नितत्समवधाने तस्याव धूमकारणतां वन्ध्यसमवधानकालीनत्वग्रहदशायां तत्र रासभासत्त्वे इत्यन्वयः। संदेहे
ज्ञाने तद्धूमे पूर्वोक्तदोषसंभवात्। परं तु संदिग्ध इति पदमालोच्य तज्जातीयसंदेहस्थाने न संदिग्धतयेत्यनेन चोक्तः। कालीनग्रहदशायां कालीनत्वनि
श्चयार्हदशायां तत्र तन्निश्चयासंभवे हेतुमाह तत्र रासभासत्त्वे इति॥ तत्र वन्ध्यसमवधानकाले एतेन रासभे वन्ध्यसमवधानकालीनत्वबाधनिश्चयः रम॰
तदनुसृतिप्रयोजको दर्शितः। तत्र रासभसत्त्वे लौकिकसन्निकर्षवशात्कालीनत्वनिश्चय एव स्यान्न तु तत्संशयो नापि तद्बाधनिश्चय इति तदसत्त्वमु ९

कं। एतदेव विशदयति शब्दभ्रमस्यापीति। तस्य शब्दभ्रमस्य। कालीनत्वादर्शनेन कालीनताभावनिश्चयेन विशिष्टसंशयात् विशिष्टनिश्चयासंभवात्।
पक्षे कालीनतादर्शनेन। कालीनतानिश्चयेन। कालीनत्वसंशये नेति यावत्। विशिष्टसंशयादिति यथाश्रुतमेव यतः धूमीय यावत्कारणेषु का
लीनतात्मकविशेषणानिश्चयएव कालीनत्वव्याप्यवृत्तिकारणकत्वरूपतद्विशिष्टाभावव्याप्यवत्ताकनिश्चयसंपादकतया विशिष्टसंशयवि
घटकः तद्विघटकस्य विशेषणसंशयो विशिष्टसंशयनिर्वाहक इति। स्वीयजनकताकारणतावत्त्वेन यावद्वस्तुनिवेशे शब्दभेकारणतासंशये विनधू
मेयावत्कारणसंदेहसंभवः शब्दभ्रमताप्रवेशादतः तस्य वन्हिसमवधानकालीनत्वसंदेहाधीनत्वं दर्शितमिति बोध्यं। नचैवं धूमकारणानवेति सं
शये कथं पारिभाषिकजन्यतानिश्चय इति वाच्यं। तस्य वन्हिसमवधानकालीनत्वसंदेहागोचरत्वात् वन्हेः धूमकारणतासंदेहे पि वन्हीतरत्वघ
टितापाद्यस्य तां प्रसिद्धिरिति बोध्यं। इत्याशंकानिराकरणायेति। तथा च संदिग्ध इति ग्रंथलभ्यसंदेहादिनिवर्तकाहेतुत्वनिश्चयो न रभेवपारिभाषि
कजन्यतानिश्चय इति भावः। अत्रकृताशनरासभादिसमुदायव्यभिचारिधूमाकल्पनलाघवेन तद्व्यभिचारशंकांपरिधूपन तत्समुदायपल्लावच्छेदेन कारण
तानिश्चयात्तद्विशिष्टतत्समुदायत्वनिश्चयस्य वन्हेः धूमकारणतासंशयविरोधितः संभवान्मोलतर्कानुप्रवेशो विमुक्त इति रासभादेरहेतुत्वनिश्चय
संपादनायासो नोपादेय इत्याशंकां चाष्टयति उक्तलाघवेनेति लाघवत्तानं व्यभिचारसंशयएवोत्तेजकं न तन्निर्णय इति वक्तव्यतात्। अत्र तथा विधे
भ्योन्वयव्यतिरेकग्रहविषयजातीयेभ्यो धूमो स्वतिं धूमो तदोत्पत्तिमित्तिदीधितित्यर्था द्धूमसामान्याहेतुत्वनिश्चयजनकः धूमत्वसामानाधिकरण्येन व्य

ग॰टी॰ भिचारग्रहो लभ्यते एवंच तद्धूमे तद्रासभाव्यभिचारसत्त्वात् तद्रासभेतद्धूमादेहेतुत्वनिर्णयासंभवे नोक्तदोषो दुर्वार इत्याशयेन शंकते यद्यपीति। य
१० त्सामान्ययोरिति नियमादिति यत्सामान्ययोर्न कार्यकारणभावः तद्विशेषयोरपि न कार्यकारणभाव इति नियमादित्यर्थः। यत्सामान्ये यत्सामान्यस्य
प्रयोजकत्वमसति बाधके तद्विशेषे तद्विशेषस्यैवेति नियमादिति पाठे। यत्सामान्ये इति अनुगतेव्यापकीभूतयद्धर्मे। यत्सामान्यस्यानुगततादृशयद्ध
र्मस्य प्रयोजकत्वं तदवच्छिन्नकारणतावच्छेदकत्वमिति यावत् बाधकं सामान्यव्यभिचारादिः एवकारः प्रयोजकत्वपदोत्तरं बोध्यः तथाच सामान्यध
र्मनिरूपितसामान्यधर्मनिष्ठप्रयोजकत्वं व्यापकं सामान्यकार्यकारणभावबाधकासमवहितं विशेषधर्मनिष्ठविशेषधर्मनिरूपितप्रयोजकत्वं व्या
प्यमिति फलितं वह्नित्वाप्रयोजकद्रव्यत्वादिव्याप्यतृणत्वादेस्तार्णत्वादिप्रयोजकत्वाद्व्यभिचार इत्यत असतीति बाधके इति बाधकं चेहान्यथासिद्धत्वं। प्र
कृते चोक्तसामान्यते। व्यापकत्वग्रहसहिताद्धूमसामान्यकारणताभावे पक्षधर्मताग्रहाद्यप्रसिद्धस्यापि तद्धूमाकारणत्वस्य प्रसिद्धिः सामान्यतो व्या
प्तिलक्ष्यया वा धूमसामान्यकारणत्वस्य तद्धूमकारणत्वव्यापकतया तदभाववत्तानिश्चयेन व्यापकाभाववत्तानिर्णयमुद्रया तद्धूमकारणताग्र
हप्रतिरोधः। अत्र धूमांतरप्रतिबंधकसमवहितवह्न्यंतराणां तद्धूमोत्पत्तिवारणाय तद्धूमं प्रति तद्वह्नित्वेन कारणत्वस्यावश्यकत्वादिति। एतेन रा
सभरूपपक्षस्य सामान्यकारणताबाधकासमवहितत्वेन विशेषणीकर्तुमशक्यतया तादृशबाधकसमवहितत्वस्यैवोक्तौ न सिद्धिरिति शंका राम॰
निरस्ता। वस्तुतस्तु सामान्यकारणताविरहावधारणादित्यस्य सामान्यधर्मावच्छिन्नानैयत्यनिश्चयादित्यर्थः। विशेषकारणताविरहेतितत्स १०

मानाधिकरणोभयावृत्तिधर्मावच्छिन्नान्यथासिद्धत्वेत्यर्थः। एतेन वैयधिकरण्यपरिहाराय सामान्यधर्मावच्छिन्नप्रतियोगिकसामान्यधर्मा
वच्छिन्नकारणत्वविशेषधर्मावच्छिन्नप्रतियोगिकविशेषधर्मावच्छिन्नकारणत्वयोर्व्याप्यव्यापकभावस्य वाच्यतया धूमत्वावच्छिन्नप्रति
योगिकरासभत्वावच्छिन्नकारणत्वतद्धूमत्वावच्छिन्नप्रतियोगिकतद्रासभत्वावच्छिन्नकारणत्वयोरप्रसिद्धिरिति निरस्तं यत्सामान्यस्य
नैयत्यं तद्विशेषे तद्विशेषस्यानन्यथासिद्धिरित्येव नियमार्थ इति न तदसंगतिः। तर्कात्कारणतानिश्चये दोषमाशंक्य व्यभिचारग्रहाभावस्य
तर्कसहकारितां स्मारयति धूमत्वेति। धूमत्वस्य महानसीयवह्निजन्यजात्यवच्छेदकत्वे लाघवमिति लाघवज्ञानसहितस्य धूमो यदि महा
नसीयवह्निजन्यो न स्यात्तदा महानसीयवन्ह्यसमवहितात् जन्यत्वे सति महानसीयवन्ह्यसमवधानकालीनमहानसीयवह्निजन्यापारेन र
यावत्कारणको न स्यादित्यापाद्यव्यतिरेकप्रमामूलकतर्कस्यावतारसंभवेपीत्यर्थः। नन्वेवमपि व्यभिचारघटकपदार्थत्रिपन्यिसादिना त
दनिश्चयदशायां कारणतानिश्चयो दुर्वार इत्याशंकामिष्टापत्त्या परिहरति। यावदिति वक्ष्यमाणतर्कः वक्ष्यमाणरीत्या महानसीयवन्ह्यादि
जन्यताग्राहकतर्कः तेन वक्ष्यमाणतर्कस्याप्रापकनिष्ठकारणताग्राहकत्वेपि न क्षतिः। भ्रमत्वमिति। कारणताग्रहकालीनव्यभिचारनिश्च
यानुव्यवसायेनाकारणत्ववति कारणत्वप्रकारकत्वमाप्यस्य व्यभिचारप्रतियोगिनि कारणत्वप्रकारकत्वस्य विषयीकरणात्। यद्यपि महान
सीयवह्निजन्यतानिश्चयानुत्पत्त्याद्यभिधानं किमर्थं तादृशनिश्चयो सत्त्वापि पारिभाषिकजन्यत्वनिश्चयाविघटनात् महानसीयवह्नेर्वन्ह्य

ग॰ टी॰ भिन्नत्वात्। न च महानसीयवह्निपदेन वह्निसमवधानोत्पत्तिकसमवधानवद्व्यापकपदार्थोऽप्रसिद्ध इति वाच्यं। तथा सति तादृशाभावो जनकताग्रहः खंडने
११ नयेन तृणाद्यजनकता। तथाविधधूमोपदर्शितवह्निव्यभिचारी सा तद्वह्निमहानसीयवह्निजन्यो जन्यादिति तर्कस्येष्टापत्तिरूपत्वसंपादनाय स्वसमभिधानं। तर्को
पयोगिनः आपाद्यव्यतिरेकनिर्णयस्य प्रदर्शनाय दीपितो यस्य चेत्यादि तत्र पद्यव्यतिरेके विशिष्टापद्य सकलकारणवद्देशीनो न पारिभाषिकजन्यत्व
लाभः। एवं तथाविधस्य तृणधूमात्पत्तेः कृत्स्नो नसत्त्वं तार्थलाभ इत्यतोऽपि न तथाविधस्य तादृक्पदार्थस्फोरके तद्धूमोत्पत्त्यव्यवहितपूर्वत्वाभावार्थके
न धूमानुत्पत्तिपदेन च्चोभयलाभं समर्थयते यद्व्यतिरेके नेति। यद्व्यतिरेकवति सतो न तत्सद्भावापादयति तत्सकलकारणसत्त्वमित्यपरे। युक्तं तद्व्यावु
हृते तत्सद्भावापादनभिन्नेति। तत्सद्भावापादनभिन्नसकलपदार्थवत्त्वासंभवादिति। धितावन्वयव्यतिरेकावयहविपर्यार्थकं तादृशेति। तद्व्याचष्टे धूमकारणे।
एतावता पारिभाषिकजन्यत्वं दर्शितं वन्ध्यसमवहितजन्यत्वं दर्शयति तदधिकरणेति। यद्व्यतिरेकावच्छेदकीभूतधूमाधिकरणत्वादृशेत्यर्थः। ति
न यद्व्यतिरेकवति स्वाव्यवहितपूर्वत्वाभावलाभादुक्तार्थलाभः। पत्तद्धांसामान्यतआलोकादौ विशेषतो वाव्याप्ति महत्स्वाधिकरणेति जन्यता
निश्चयेऽकारणतासंदेहस्य समानाकारतया विरोधित्वादाह वह्नीति। ननु विरोधिताभासादपत्तिसंगतं तत्र विरोधीत्यस्यैव युक्तत्वात्तु संदेह
स्य प्रतिबंधकत्वाप्रयोजकत्वाच्चेत्यत आह एकत्रेति। कार्यनिष्ठानुत्पद्यमानतामयोजकत्वं च तस्याक्षतमेव। एकत्र एकशरीरावच्छेदेन ए ए म॰
कात्मनीति न कापव्यूहपरिपुरस्य वेशयोस्तत्संभवेऽपि न क्षतिः। एतत्तर्कस्योपयोगित्वं तर्कहेतुरित्यावश्यकत्वस्फोरणाय। आपाद्यव्यतिरेकनि ११

पि

णीयस्याहेतुत्वेऽइष्टापत्तिशंका स्यात् तद्भूतस्यानापादकशंकानिवर्तकत्वसंभवः अनिष्टप्रसंजनस्यैव तर्कत्वात् आपादकत्वानेद्वैवानुत्वात्तेश्च
।एवं विपर्ययानुमितिरपि द्रष्टव्या स्यात् आपाद्यविपर्ययेबाधित्वशंकासंभवात्। तादृशेति व्यतिरेकव्याप्तिभाने आपाद्याभावे आपादकाभा
वव्याप्तिलाभेप्यन्वयव्याप्तिभावस्थले तदसत्वादिति भावः। आपाद्येइति यद्यपि पक्षतावच्छेदकवति आपाद्यव्याप्यापादकवत्ताज्ञानमेव तर्क
हेतुः अन्यथा तद्विरहे तर्कोत्सादप्रसंगात् तन्नचनापाद्यानुमितिः। ज्ञानद्वयसाधारण्याः संशयसाधारण्याश्च तत्कारणतायाः स्वीकारात्।
यत्तु व्याप्त्यंशे निश्चयस्यैव तर्कप्रसपेक्षणीयतया तत्र यथाऽप्रामाण्यग्रहाभावो विशेषणं तथा पक्षधर्मतांशे तदनपेक्षायामपि अप्रामाण्यग्र
हस्येवापेक्षणान्न तदनुमित्यापत्तिरिति तन्न। तथासति तत्राप्रामाण्यग्रहविरहदशायां तर्कापहृवप्रसंगात्। तथापि आपादकांशेऽन्वयव्याप्तिभा
नस्थले आपाद्यमापादकव्यापकमिति ज्ञानसंपत्त्या आपाद्यव्यतिरेकनिरूपकतदभाववत्ताज्ञानसंपत्त्या च तस्यैव तद्धर्मावच्छिन्नविशेष्यका
पादकव्यापकताग्रहकालीनतद्धर्मावच्छिन्नाभावनिश्चयत्वेन तर्कहेतुत्वं आपाद्यसामानाधिकरण्यविषयतायास्तदंशे निश्चयत्वस्य चा
निवेशेन धूमव्यापको वह्निः तदभाववांश्चायमित्यादि तत्सामानाधिकरण्याविषयकज्ञानसंग्रहेणाचलाघवात्। नचैवमापादकाभावानु
मितिप्रसंगः भिन्नविषयेनुमितिसामग्र्याबलीयस्त्वात् व्यतिरेकिणि धूमव्यापकवन्ह्यभाववानिति विशिष्टवैशिष्ट्यावगाहिज्ञानानपेक्षणादि
तिवाच्यं तर्कस्याहार्यत्वेच्छाघटितसामग्र्याबलीयस्त्वात्। आपाद्यव्याप्यापादकवत्ताज्ञानहेतुतामतेपि तन्निश्चयेऽनुमितिवारणाय विरोधि

ग॰ टी॰
१२
12

विषयकापादकाभावावगाहित्वंसंशयसाधारणंजनकतावच्छेदककोटौनिवेश्यंतावताऽनाहार्य्यतादृशापादकनिश्चयव्यावृत्तहेतुतात्ता
भावन्नदोषः।वस्तुतस्तुापाद्यव्यतिरेकनिर्णायस्यविरोधितयैवानुमितिविरहोपपत्तावनाहार्य्यनिश्चयस्यसामग्रीघटकतावारणायैवतत्प्रवे
शनमावश्यकं।एवंचापादकमापाद्यव्याप्यंतद्वान्धर्मीत्यायमितिज्ञानद्वयस्थलेआपादकव्यापकापाद्याभाववत्ताज्ञानस्थलेचानुमितिप्रसंगो
प्युक्तस्थलेतत्प्रसंगःज्ञानद्वयसाधारणहेतुतास्वीकारेदुर्वारइतिपूर्वपक्षोपपत्तिः।तन्मतेपितस्यप्रवेशानीयत्वात्आपादकाभावआपाद्या
भावव्यापकःआपादकवांश्चायमितिज्ञानस्यानुमितिजनकत्वाऽनाहार्यत्वमावश्यकंतत्र [illegible] +एवंव्यतिरेकव्याप्ति
भानस्थले+तुल्यवित्तिवेद्यत्वपक्षेपाद्याभावःआपादकाभावव्याप्यस्तद्वांश्चायमितिज्ञानसंपत्त्यातस्यैवसामग्रीघटकत्वंपूर्वत्वव्याप्यंक
रादिकाशादिमांश्चायमित्यादिज्ञानसंग्राहकेणतद्धर्मावच्छिन्नविशेष्यकापादकाभावव्याप्यत्वग्राहकालीनातद्धर्मावच्छिन्नवत्तानिश्चयत्वेनत
र्कहेतुतानस्यैवचआपादकशंकानिवर्त्तकत्वमितितत्रतर्कवैयर्थ्यस्यसिद्धांतिनोपीष्टत्वमित्याशयेनसामान्यतएवकिंतर्केणेत्युक्तं।नचैवमेव
व्यतिरेकव्याप्तिस्थलेप्यापादकव्यापकताज्ञानमेवकल्प्यमितिशंकाशयोस्त्विति वाच्यं।व्यतिरेकव्याप्तेस्तर्कोपयिकतायागेवहव्याकोपापत्तेः।एवंतर्क
प्रतिआपादकव्यापकीभूताभावाभाववान्पक्षइतिआपादकाभावव्याप्यीभूतापाद्याभाववान्पक्षइतिचविशिष्टवैशिष्ट्यतानत्वेननहेतुताज्ञानद्व
यस्थलेविशिष्टज्ञानापेक्षापत्तेः।केचित्तुउक्तरीत्याव्यतिरेकव्याप्तिस्थलेज्ञानद्वयसाधारणंतर्कहेतुत्वेव्यापकताघटंशेनिश्चयत्वनिवेशेमोरे

तु। तुल्यवित्ति
वेद्यता ४

राम॰
१२

४ तुल्यवि॰

वादनाहार्यत्वं द्विशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेनैव तर्कहेतुतोपपत्तेः। आपादकज्ञाननिवर्त्तकतानुज्ञानद्वयसाधारण्ये विशिष्टवैशिष्ट्याव
गाहिज्ञानमात्रवृत्तित्वं आपाद्याभाववत्ताज्ञानसावच्छेदकधर्मदर्शनविधयैववेसम्पदेतत। आपाद्यव्याप्यत्वाविशेषितापादकाहार्य्यत्वसंशयो
वास्वातंत्र्येणहेतुरिसाङ्कःकारणज्ञाननियमेनैव च व्याप्तिस्थले व्यतिरेकव्याप्तिस्थले तत्कारणज्ञानाया अनभिमतत्वात् तज्ज्ञाने च्छपोपयोगिपद्ये आ
पादकव्यापकताज्ञानोत्तरमिच्छापाद्यव्यतिरेकनिर्णयोत्तदयोगपद्ये एकदेवापाद्यव्यतिरेकनिर्णयापादकव्यापकताज्ञानोभयोत्तरमिच्छातत्त
त्तर्कसत्वेषांकानुत्पत्त्यनुरोधेनाह आपादकव्यापकताज्ञानाच्चेति। अन्नापादकाभाववत्ताज्ञानाच्चेति पाठे तर्ककारणीभूतापादकवत्ताज्ञानस्या
हार्यत्वेनापादकस्याभावस्य चावश्यमुपस्थितिसात्तन्मानसात्मकतर्कोपि संभवति। सचापादकाभाववत्ताज्ञानत्वेनैवापादकसंशकाविरोधीति सं
गमयंति आपादकस्याप्युपलक्षितत्वात्तद्विषयकत्वं तु सर्वस्य समर्थनीयं कुतश्चित्तत्तदितरविषयकेच्छावशादित्यर्थः। न च प्रतिबंधक
मुपगम्य तादृशज्ञानानुत्पादकत्वं नंकिमर्थं तर्कात्मकतादृशज्ञानोपमीय तर्कस्य तादृशज्ञानत्वेन विरोधित्वोपपत्तेरिति वाच्यं। तथा सति तर्के
आपाद्यविषयताया अननुयोगप्रसंगात्। न चैवं तर्कस्याहार्य्यतया आपाद्याभावधर्मितावच्छेदककत्वात्कथमेतदिति वाच्यं। आपाद्याभावं पुरस्कृत्य
ज्ञानेच्छापाद्यधर्मितं पुरस्कृत्यापाद्याभावज्ञाना द्विशेषितात् एवमिच्छाविरहविशिष्टविरोधिसामग्र्यापि तदन्यमानत्वविरोधिनी द्रष्टव्या। अत ए
वापाद्याभावेनकचिदापादकाभावसिद्धिरितितत्फलात्तदुत्तरकालीनशंकानिवर्तकत्वादितिस्त्रचितं। ननु प्रकृतपक्षे आपादकवत्ताज्ञानस्यप्र

ग०टी० कृतपक्षे आपाद्यप्रसक्तत्वं न तज्जन्यतावच्छेदकं तर्कानात्मकाहार्यापाद्यज्ञाने व्यभिचारात् अत एवाहार्यत्वविशिष्टं तत्तथेति निरस्तं। नापि आ-
१३ पाद्यनिरूपितविलक्षणविषयिताशालिज्ञानत्वं। तादृशविषयितायां मानाभावात्। न च तर्कत्वं तर्कयामीति प्रतीतिसिद्धो जातिविशेषस्तथेति
वाच्यं। तर्कत्वरूपजातिविशेषोपगमेपि अन्यांशे तर्कात्मकापाद्यज्ञाने व्यभिचारात्। नापि तत्तत्तर्कत्वं जातिविशेषस्तथेति वाच्यं। आपादकद्वयप्रसक्तमूहा-
13 त्मकं न तज्जन्ये आपाद्यं द्वयावगाहितर्के तादृशजात्यभावेन व्यभिचारात्। अन्यथा जातिसंकरापत्तेः। तत्तन्मयजन्यतावच्छेदकापरजातिस्वीकारे परस्प-
रप्रतिवध्यप्रतिवंधकभावस्वीकारे च महागौरवात्। न चापादकज्ञानाव्यवहितोत्तरतादृशप्रसक्तत्वं आपाद्यव्यतिरेकज्ञानविरहिणि तादृशे अ-
न्यांशे तर्कात्मकापाद्यानाहार्यज्ञाने गतत्वात्। न चेष्टापत्तिः। तेनाप्यापादकशंकोच्छेदापत्तेः। न चापाद्यव्यतिरेकज्ञानविशिष्टतादृशप्रसक्तत्वं आपा-
द्यापादकव्याप्तिज्ञानविरहिणि तादृशे अन्यांशे तर्कात्मकापाद्यज्ञाने गतत्वात्। किं त्वेकविशिष्टेऽपरवैशिष्ट्यमिति रीत्यापादकव्यापकीभूतापा-
द्याभाववद्विशिष्टे प्रकृतपक्षे आपाद्यप्रसक्तत्वमेव तथा। प्रसक्तज्ञाने कारणीभूतज्ञानविषयमाने बाधकाभावादिति न व्यभिचारः। विशकलितप-
दार्थोपस्थितिमूलके विशेष्ये विशेषणमिति रीत्योपनीतभाने व्यभिचारवारणाय रीत्येत्युक्तं। एवं च तर्के कारणीभूतज्ञानविषयमानने पक्षमेव वि-
रोधिसामग्र्यादिवशाद्व्याप्यभाने तर्कत्वासंभवात्। व्याप्यविषयकज्ञानस्य कार्यत्वानाक्रांतत्वात्। एवं व्यतिरेकव्याप्यधीनतर्के आपादकाभाववद्व्या- राम०
प्यापाद्याभाववद्धर्मितावच्छेदककत्वमपि स्वीकार्यमिति महत्साहसमिति चेन्न। आपाद्यत्वस्य कार्यतावच्छेदकतानत्कारणीभूतज्ञानविषयमानने १३

पत्तेमानाभावात्। आपाद्यत्वस्य विधेयतारूपत्वेनागौरवाच्चात्तद्धर्मावच्छिन्नोद्देश्यतानिरूपिततद्धर्मावच्छिन्नापाद्यताशालिप्रत्ययत्वावच्छिन्नं
प्रतितद्धर्मावच्छिन्नविशेष्यकापादकज्ञानहेतुत्वेन व्यभिचारानवकाशात्। नचनानापादकवैकापाद्यकतर्के व्यभिचारवारणाय कारणताव्य
वहितोत्तरत्वावच्छिन्नकतयाभिमापाद्यत्वनिवेशोनेतिवाच्यं। उक्तदोषेणापाद्यतायाएवतत्र निवेशनीयत्वात्। एवं चतत्तद्विशिष्टानाहार्यज्ञानाद
पि नशंकोच्छेदः। अतएव पर्वतोधूमाभाववानित्यनुमितिसाधारणकार्यतावच्छेदकानुरोधेन तत्र प्रत्यक्षत्वस्य निवेशः। एवं धूमाभावव्याप्यवन्ह्य
भाववानिति व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वेन तर्कहेतुतां केचिदुपगच्छन्ति। यत्तु तर्ककारणतानविषयस्य तर्केभानेमानाभावात्तस्यातन्त्रे
णतस्य शंकाप्रतिबंधकत्वमते तर्कयामीतिप्रतीतिसिद्धं मानसत्वव्याप्यजातिविशेषात्मकं तर्कत्वमेव कार्यतावच्छेदकमिति तन्नाकेव
लतर्कत्वेन आपाद्यविषयकतर्कत्वेन वा प्रतिबंधकत्वे उक्तदोषात् तर्कत्वनिरूपिततत्तदापाद्यनिष्ठविलक्षणविषयताशालित्वेन तथात्वेऽ
तिरिक्तजातिस्वीकारवैयर्थ्यात्। नानाजातिस्वीकारस्यापि उक्तरीत्या संकरग्रस्तत्वात्। अन्ये तु व्यापकाभाववत्पादनाधीनव्याप्याभावापादनं तर्कः
तत्र व्यापकाभावांशे आहार्यअप्रामाण्यज्ञानानास्कन्दितं वा ज्ञानं कारणमतो न तदुत्तरमनुमितिः फलीभूतज्ञानमप्याहार्यमेव विरोधिज्ञान
कालीनत्वात्। व्यापकाभावज्ञानत्वेन चजनकत्वं विवक्षणीयं तेनापादकापादनानुव्यवसायेव्याप्याभावविषयके नातिप्रसंगः। व्यापकाभावाद्य
नुगमेनाननुगमः परंपरीक्षिष्यते सोपितद्वृत्तिमानसत्वव्याप्यजातिमत्त्वविवक्षयानिरसनीयः। तर्कत्वंच जातिविशेषः तर्कयामीतिप्रत्यय

सिद्धः स्वप्नस्तु न तर्क इति न स्वप्नत्वेन सांकर्यं। न च स्वप्नात्मकः कुतो न तर्कः आपाद्यव्यतिरेकनिर्णयस्याप्रामाणिकत्वापादुर्वचत्वात्ऽ सुषुप्तिप्राक्का
लीनात्ततः स्वप्नस्यापि दुर्वचत्वात्स्वप्नत्वस्य तर्कत्वविरुद्धत्वाच्च। तर्कश्च वह्निमान्पर्वतो यदि वह्न्यभाववान्स्यात्तदा धूमवान् पर्वतो धूमाभाव
वान्स्यादित्याकारः। अत एव च तर्कस्याप्रमात्वं। यदि जलह्रदो वह्न्यभाववान्स्यात्तदा धूमाभाववान्स्यादिति ज्ञानस्य प्रमात्वेऽपि न क्षतिः। वह्निमा
न् ह्रदो यदि वह्न्यभाववान्स्यात्तदा धूमवान् ह्रदो धूमाभाववान्स्यादित्यस्यैव तर्कत्वोपगमात्। यदि चापाद्यापादकव्यतिरेको तर्के न भासेते त
दा सत्तर्कस्यैवाप्रमात्वं सत्त्वं च यथान्याभाववद्विशेष्यकत्वं। प्रयोक्तुरनभिमतपदार्थस्य पराभ्युपगमेनापादकत्वेन तर्के पक्षे आपादकस्याहा
र्यज्ञानं हेतुः। यदि चापाद्यापादकव्यतिरेकयोस्तर्के भानं प्रामाणिकं तदा तस्य संशयाकारतावारणाय कार्यतावच्छेदके तद्भेदोऽपि निवेश्यः। य
द्वा तर्के आपाद्यव्यतिरेकज्ञानसामान्यस्य न कारणत्वं तथासति संशयस्यापि कारणत्वापत्तेः तदुपस्थितविरुद्धकोटेस्तर्के भानप्रसंगेन संशयत्वप्र
संगात् किंतु तन्निश्चयस्यैवेति तस्य धर्मितावच्छेदकतयैव भानादाहार्यत्वं। यद्यप्यापादकांशे तस्य संशयरूपत्वेन दोषः तदंशे संदेहस्याप्यनुव्य
वसायेऽनुपपत्तिसंभवात्। तथाप्यापादकस्यापाद्यधर्मितावच्छेदकत्वनियमनिर्वाहायापादकनिर्णयो हेतुः स्वीकार्यः। आपादकांशे संशयस्य हेतु
त्वेऽपि आपादकाभावधर्मितावच्छेदककापादकज्ञाने व्याप्य एव तत्संशयविरोधित्वान्नाहार्यतत्संशयरूपताया अपि प्रसंगः। आपाद्यो वापादकस्य त॰ म॰
पराभ्युपगमोऽपि हेतुः पक्षे पराभ्युपगमेन स्वमध्यास्थेत ह्यनभिमतपरानभ्युपगतपदार्थस्यापादनीयत्वादिति वदंति। आपादकशंकाद्विविधा आ १४

हार्य्यास्त्वनाहार्यं च तत्रानाहार्यायास्तर्ककारणीभूतज्ञानादेव निश्चयात् व्याहार्याया निरासार्थं तर्क इति मिश्रमतमाह आहार्येति नन्वाहार्यशंका
तर्केणापि किमर्थमुच्छेत्तव्याऽविरोधित्वादित्यत आह तादृशेति। अत्राहार्यशंकासामग्र्याः प्रतिबंधकत्वे तत्संशयोपि प्रतिबंधकः स्यादन्यथा
यद्वीसामग्रीयत्र प्रतिबंधिका तत्र तत्संशयोपीति नियमभंगापत्तेर्गौरवाच्चेत्यतः सामग्र्याः प्रतिबंधकत्वमनुपपन्नमेवार्थतो निश्चयानुत्पत्तिमाह
तत्सामग्रीति सा च वह्निजन्यत्वाभावज्ञानं भवत्विती च्छा। तद्विघटनं च यथा संशयस्य तु स्वजनकत्वेन तत्र द्वेषस्तथा तर्कस्यापि मितापाद्यव्यतिरे
कविरूद्धार्थविषयकत्वप्रयुक्तः स्वाहजिकद्वेषः स्वसाधनताग्रहाधीनो वा तत्र द्वेष इति तज्जनकापादकज्ञाने द्विष्टसाधनताज्ञानाद्द्वेष इति तत्रे
च्छाविघटनात्। न च तर्कस्यानिष्टसाधनत्वाविषयकतया कथमिच्छाविघटनमिति वाच्यं। अनिष्टप्रसंजने। तर्कं तादृशोपनायकवशान्मान
सद्विष्टसाधनताज्ञानोपगमात्। न चापत्तिरूपद्विष्टं प्रति स्वरूपयोग्यताया तर्कात्प्रागपि सत्वेन तत एवापादकज्ञाने च्छाविघटने किमंतर्गत
र्केणेति वाच्यं। फलोपधायकतारूपद्विष्टसाधनताया एव द्वेषप्रयोजकत्वात्। अन्यथाऽहितुण्डिकादेरपि तथात्वप्रसंगात्। आपत्त्यापादके आपत्तिरू
पद्विष्टसाधनत्वग्रहात् तज्ज्ञाने द्वेष इति तत्त्वा। तज्ज्ञानस्यापादकजन्यत्वयाततत्र द्वेषोत्पत्तेरसंभवात् लिंगवदापादकस्यापत्स्यहेतुत्वात्। न चापादकशंका
छांप्रति लाघवेन तर्क एव प्रतिबंधकोस्त्विति वाच्यं। तस्यापादकज्ञानमनिष्टसाधनमित्याकारकत्वाभावात् नापि तर्कत्वेनाप्याघकत तर्कादेरपि प्रकृता
पादकाशंकाप्रतिबंधापत्तेः। स्याद्यावेदितत्वात्। एवं चापादकसंशयोपि तर्कहेतुः अन्यथापादकनिर्णयमात्रे द्वेषोदयेपि तत्संशये च्छासंभवेन

ग॰टी॰ तर्कस्यापादकसंशयसामग्र्याऽप्रविघटकत्वापत्तेः यद्धर्मावच्छिन्ने द्विष्टसाधनताज्ञानं तद्धर्मावच्छिन्नेच्छाविच्छेद इतिनियमात् अन्यथा नीलघ
१५ टवत्ताज्ञानेऽनिष्टसाधनताज्ञानेपि घटवत्ताज्ञानेच्छोदयो न स्यात् इत्तोपि च वन्ह्यसमवहिताजन्यत्वस्यापाद्यप्रतियोगिकोटिविशेषणत्व
मादरणीयं अन्यथा तद्विशिष्टवह्निजन्यत्वाभाववत्ताने द्विष्टसाधनताज्ञानेपि शुद्धवह्निजन्यत्वाभाववत्तानेच्छाविच्छेदानुपपत्तेः आपादकनिर्णयसे
15 व तर्कहेतुत्वेपि आपादकत्वानन्तावच्छेदेनानिष्टप्रसंजकत्वमानस्तवशात्तद्धर्मसामानाधिकरण्येनापि संशयेपि इच्छानुदयाद्या शुद्धयद्धर्माव
च्छिन्नधर्मिकपदापादकक निर्णयस्य हेतुताशुद्धतद्धर्मावच्छिन्नतदापादकज्ञानसामान्ये द्वेषदृत्तित्वीकार्यं नीलपर्वतोयदि वन्ह्यभाववान्स्यादि
तर्कस्थलेशुद्धपर्वतेवन्ह्यभाववत्तानेच्छोदयादिति वन्ह्यसमवहिताजन्यत्वस्यपक्षविशेषणत्वं हेयमेव। एवं चैतादृशरीत्याऽऽहार्यशंकानिव
र्त्तकतयातर्कोपयोग इति भावः अत्र तदापाद्यकत्वमेव द्विष्टतावच्छेदकं धर्मिविषयकत्वनिवेशप्रयोजनाभावादिति तर्के धर्मिविषयकत्वाश
वैयर्थ्यमिति न शंक्यं सामग्रीसत्वे तद्दर्शनात्मभिवेशाद्विषस्यावर्जनीयत्वात्। नापि तर्कस्याहार्यतया न तत्र द्वेष इति शंक्यं। तदिच्छानाशे तत्र द्वेषोत्सत्तेर्बा
धकाभावादिति। अत्र कुतश्चित्प्रतिबंधकादिति रीत्यातर्कस्यानाहार्यशंकाप्रतिप्रतिबंधकत्वस्यावश्यकतयातत्रैवानाहार्यत्वानिवेशो नाहार्य
यो अपि प्रतिबंधस्तिद्धेरिच्छाविघटनादिविलंबकस्य न मसंगतमित्यस्वरसः। केचित्तु तर्कस्य स्वविषयातिरिक्तज्ञानमात्रप्रतिबंधिकामाइच्छाया ग॰म॰
विघटकत्वे यस्यकस्यापि तस्य यत्र क्वापि उपयोगसंभवेनासाधारण्येन व्याप्तिग्रहादावुपयोगानुपपत्तिरित्यस्वरसात्सामान्यं परेतु तर्कआरितत द्व्यह १५

कसामग्रीविशिष्टत्वादेव ज्ञानं सामान्यव्यभिचारशंकावतिबंधकतया मुत्तेजकमिति तर्कोपयोगः। अत एव विनश्यद्वस्थापादकवत्त्वाज्ञान
जन्यतर्कस्यापि व्याप्तिग्राहकत्वं तद्धूमे निरुक्तान्वयव्यतिरेकग्रहदशायां सामग्री च धूमसामान्ये कार्यताग्राहिका तत्सत्त्वे धूमसामान्ये व्यभिचा
रशंकासत्त्वेपि तस्यास्तर्के सत्त्वेः किंचित्कारत्वादिति वदंति। तत्सामग्र्यामुत्तेजकत्वेन दृष्टकपदार्थानां विशेष्यविशेषणभावे विनिगमनाविरहे
णगौरवात्स्वयोजनाभावाच्चोपेक्षितं अकारणत्वसंदेहो निवर्त्तते येन तर्केणोत्पस्येवाभिधानात् तच्च सामान्यव्याप्तिग्रहरूपकारणतानिश्चयंप्र
तिसामान्यव्यभिचारशंकायप्रयोजकारणत्वसंदेहो निवर्त्तते प्रतिबंधकसमो भवति येन तर्केणानुकूलोत्तेजकत्वादिति व्याख्यानमनादेवं सामान्यव्याप्ति जे
विशेषमात्रस्योरसत्त्वस्यैव स्वमारणत्वाच्च। यद्यप्यनुसंधेयस्यावश्यं कार्यकारणभाव इति पठितव्यं तथापि तदधीनत्वादिति तस्य दृश्योपसर्जनीभूतानु
संधानपरामर्शकत्वं स्यात् अतः कार्यकारणभावग्रह इति पाठे निर्भरः। अनुसंपदो पसंहारानान्नाधाजोरपेक्षार्थकत्वेन न तद्ग्रहानुसंधानलाभः शंका
।प्रकृतोपयोगिता हटनापपूरयति व्याप्तिग्रहार्थमिति। व्यभिचारविरोधित्वं व्यभिचाराभावव्याप्यत्वं व्यभिचारवद्वृत्तिव्याप्यत्वं वा व्याप्तिश्चान्वयतो
व्यतिरेकतश्च। व्यभिचारवद्वृत्तित्वं वा। विनश्यद्वस्थकार्यतानिश्चयस्यालेप्याह आपाद्येति संशयनिश्चयसाधारणज्ञानं प्रति तदापादकत
र्कत्वेन प्रतिबंधकत्वात्। वस्तुतस्तु स्वतंत्रं दृष्टांतविधया उक्तं तर्कोपयोगिताप्रक्रमादिति ध्येयं। व्याप्तिघटितत्वादिति कार्याव्यवहितप्राक्काला
वच्छिन्नत्वांशस्याधिक्येपि कार्यव्यापककारणकत्वस्याक्षतत्वादिति भावः। कार्यताघटकयावन्निश्चनानुमितेरोपपादकत्वं नित्यहेतुके तद्धूमध्वंसवान्

तद्धूमादित्वादेर्व्याप्तेः। एवं प्रतियोगिन्यधिकरणकार्याधिकरणवृत्त्यभावाप्रतियोगित्वं न कार्यताघटकं। समकालोत्पत्तिकानां रूपरसादी
नामप्येकं प्रसज्यान्यस्य कारणत्वप्रसंगात्। तद्धेद्वयनिवेशे महागौरवादित्यभिप्रायेण समाधत्ते कार्यताघटकमप्रेरिति। तज्जोन्यत्वादिति। न चैवमपि धू
मः स्वाश्रयवह्नितप्राक्क्षणावच्छेदेन स्वसमानाधिकरणाभावाप्रतियोगिवह्निकः स्वसमानाधिकरणाप्रतियोगिन्यधिकरणाभावाप्रतियोगिवह्नि
कश्चेति समूहालंबनात्मको व्याप्तिनिश्चयो दुर्वार इति तदधीनत्वकथनमसंगतमिति वाच्यं। तथापि सर्वोपि तथाविधकार्यतानिश्चयो व्यभिचारसंशया
त्मक एवमभवेन्न तु कोपि तदनात्मक इति ग्राह्यसंशयप्रतिबंधकतामते नैतदभिधानात्। एवं विशेषदर्शनस्य पूर्वकालवर्तित्वेनैव प्रतिबंधकत्वमिति
मतमुपगम्येतदुक्तं अन्यथा कार्यताव्याप्तिव्याप्यतयोस्तन्निश्चयरूपविशेषदर्शनसत्त्वे संशयसामग्रीघटना न भवेदिति अत एव तस्य कार्यकालवर्त्ति
तया प्रतिबंधकत्वमते ग्राह्यसंशयस्याप्रतिबंधकत्वमादायेति रुक्तसमूहालंबनात्मकव्याप्तिनिश्चयरूपकल्पांतरं दीधितिकृदुक्तमवतारयति का
र्यताग्रहकालेपीत्यादिना। कार्यकारणभावग्रहे कार्यताघटकतया अनुमित्यौपयिकव्याप्तेर्भानेपि कार्यतायास्तद्घटकव्याप्तिनियततत्वेसादिः। एते
न व्याप्तिकार्यत्वयोः सामान्याभावविशेषाभावात्मनोर्भेदाद्वापादेः नाप्यापाद्यमिति मतं हेयं। तस्योक्तरीत्यापक्षांतरार्थकत्वात्। पत्तु कार्यकारणभाव ग०म०
वग्रहइति विशेषणानामिति शेषः। धूमविशेषपक्षकतर्केणात्तस्यैव जननात् अत्र व्याप्तिग्राहकहेतुतामुपपादयति तदधीनत्वादिति। तथा च विशेषव्या
प्तिघटितविशेषकार्यताग्रहेण सामान्यव्याप्तिघटितसामान्यकार्यताग्रहोपपद्विशेषयोरितिन्यायादिति भावः। विशेषाणां कार्यकारणभावग्रहो जा

यमानं इत्यग्रिमान्तरोधेन कल्पान्तरमाह सामानाधिकरण्येनेति दीधितिविवरणे। तत्कार्यताभाश्रयभूमिसंगमाघटितत्वात् विशेषणाण्यामित्याद्याहा
राभावे पि उक्तरीत्या तत्सत्वे वेत्यादिदीधितियोजनासंभवाच्चानादेयं। विपरीतकोटिमानविरहप्रयोजकं दर्शयति। कार्यसहवर्त्तितयेति। इतीति इति हे
तो रित्यर्थः। ननु सामानाधिकरण्येनेत्यस्यार्थ अधिकरणयोरन्वयव्यतिरेका सत्त्वादत आह एकदेशेति। एकदेशेति संयोगसंबंधावच्छिन्नकार्यता
तादृशकारणतांचेतियावत् तत्सत्वे वेति तथाच निरुक्तव्याप्तिकार्यतयोः समूहालंबनं संभवतीत्यर्थः। तद्धर्मावच्छेदेन तद्धर्मावच्छिन्नसंयोगसंबंधा
वच्छिन्नकारणतानिरूपितसंयोगसंबंधावच्छिन्नकार्यत्वप्रकारकग्रहं प्रति तद्धर्मावच्छेदेन तद्धर्मावच्छिन्नतत्कालावच्छिन्नसंयोगसंबंधावच्छि
न्नाधेयतानिरूपिताधिकरणतावन्निष्ठाधिकरणतानिरूपितत्तत्कालाव्यवहितपूर्वकालावच्छिन्नसंयोगसंबंधावच्छिन्नाधेयतावच्छेदकोपि
धर्मस्तद्धर्मावच्छिन्नसंयोगसंबंधावच्छिन्नाभाववत्तावच्छिन्नतत्कालावच्छिन्नदैशिकविशेषणतासंबंधावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निष्ठा
धिकरणतानिरूपिकतदव्यवहितोत्तरकालावच्छिन्नदैशिकविशेषणतासंबंधावच्छिन्नाधेयतावच्छेदकीभूताभाववत्तावच्छिन्ननिरूपितसंयो
गसंबंधावच्छिन्नप्रतियोगित्वग्रहो हेतुरिति रीत्या कार्यकारणभावो ग्राह्य इति भावः। अत्र च कार्यकारणभावावच्छेदकप्रत्यासत्त्यवच्छिन्नान्वयनि
वेशादितरप्रत्यासत्त्यवच्छिन्नाच यद्ग्रहदशायां तादृशप्रत्यासत्त्यवच्छिन्नप्रतियोगिताकव्यतिरेकानिवेशादितरप्रत्यासत्त्यवच्छिन्नप्रतियोगि
ताकव्यतिरेकग्रहदशायामन्वयग्रहविरोधिता नियामकसंबंधेन तादृशव्यतिरेकवत्त्वनिवेशाच्चतदितरसंबंधेन व्यतिरेकवत्त्वग्रहदशायां नोक्तहे

ग०टी० तुताग्रहापत्तिः। एवं संयोगावच्छिन्नकार्यकारणभावग्रहप्रतिबंधकत्वे दर्शितान्वयव्यतिरेकग्रहात्संबंधांतरेण कार्यकारणभावग्रहप्रसंगवा
१७ रणाय कार्यतावच्छेदककोटौ संयोगोपादानं व्यतिरेक[illegible]व्यापकताग्रहो निवेश्यः प्रयोजनं तूक्तं। ए
17 तावता वह्न्यभाववान् धूमवानित्यादिव्यभिचारग्रहप्रतिबंधकत्वेव वह्न्यभाववान् धूमाभाववानिति ग्रहस्य सत्त्वेन व्यभिचाराग्रहान्वयसहचार
ग्रहरूपानुमित्संगव्याप्तिग्राहकसामग्रीलाभः। नचैककालावच्छेदेनैकप्रतियोग्यभाववत्ता तानयोः परस्परविरोधित्वाद्वह्न्यभाववत्तत्कालावच्छे
देन धूमाभाववत्ताज्ञानं तत्र कालांतरे धूमसंभावनाया न विरोधि। एवं स्वावच्छेदककालोत्तरकालावच्छिन्नस्वाधिकरणावृत्तित्ववदभावाप्रतियोगित्वस्य
व्यापकतानात्मकतया संसर्गतानवच्छेदकतया तद्विशिष्टविशेषणतासंबंधेन धूमाभाववत्ताज्ञानमप्रसिद्धमेवेति वाच्यं। वह्न्यभाववद्धर्मितावच्छेद
कीकृत्य तद्व्यापकत्वविशिष्टोत्तरकालावच्छिन्नविशेषणतासंबंधेन धूमाभाववत्ताज्ञानस्यैवोक्तत्वात् तद्व्यापकत्वविशिष्टायाउत्तरकालावच्छि
न्नधूमाभावप्रतियोगिकविशेषणतायावा संसर्गत्वंबोध्यं। नच कारणसत्त्वहृदपइति कारणाभावइति विवरणसंगतिः पारिभाषिकजन्यतानिश्चया
र्थ एतत्कल्पे पिच्छावधारणादेरावश्यकतया तत्र सामान्यतोऽन्वयादिग्रहस्यैवापेक्षणीयत्वेन तस्यैव सामानाधिकरण्येनेत्यादिनादीधितिकृद्भिरभिधा
नादितिवाच्यं। व्याप्तिकार्यत्वयोरेतमूहालंचनपक्षे वह्निकार्यतानिश्चयपूर्वं व्याप्तिग्राहकसामग्र्या अनावश्यकतया जन्यतानिश्चयार्थमपेक्षणीयो रा०म०
ऽन्वयादिग्रहो न परित्यज्यते इह तु वह्निकार्यतानिश्चयपूर्वं व्याप्तिग्रहजनकसामग्रीसंपादनानुरोधेन तत्परित्यागात्तदसंगतिविरहात्। अग्रे एवं तर्कसाध्य १७

स्यानुपपत्तिः कार्यतानिश्चयस्य व्याप्तिग्राहकतर्कानुत्थापकत्वादिति चेन्न। ग्राह्यसंशयस्याप्रतिबंधकत्वे पि व्याप्तिनिश्चयस्य कार्यतासंदेहरूपत्वे
विशेषदर्शनत्वाभावेन व्यभिचाराभानप्रसंगात् इति चेत् कार्यत्वसंशयसामग्रीविघटकतया तस्योपयोगित्वात्। अथ तथापि तर्कवैयर्थ्यं दुर्वारमेव
व्याप्तिग्रहस्य कार्यतासंदेहरूपत्वे पि व्यभिचाराभानाप्रसक्तेः। सामानाधिकरण्येनान्वयादेः पि व्यभिचाराव्यावर्तकत्वादिति चेन्न। तादृशान्वया
दौ व्यभिचारव्यावर्तकत्वाग्रहदशायामेव तत्सार्थक्यात्। न चैवमुपादानस्य वन्ह्यसमवहितजन्यत्वव्यावर्तकताग्रहवैफल्ये नियमाभिधाना
संगतिरिति वाच्यं। तत्रानुभवसिद्धकारणताग्रहरूपफलानुरोधेनोपादानप्रतिबंधकतानिर्वाहकतादृशव्यावर्तकतानियमे पि व्यभिचारव्यावर्तक
ताग्रहनियमे मानाभावात्। तथाविधान्वयादेः सामानाधिकरण्येन ग्रहस्य सामानाधिकरण्येन व्यभिचारग्रहं प्रत्यविरोधित्वात् तर्कस्य सार्थक्याच्च
। न चान्वयादिग्रहादेव कार्यतानिश्चयसंभवाद्व्याप्तिनिश्चयस्य न कार्यतासंशयापहत्वमिति वाच्यं। तथापि अन्यथासिद्धत्वघटितकार्यता
निश्चयस्य विना तर्कमसंभवात्। नन्वेकदेशघटितत्वघटितत्वं किमर्थमित्याशंकां निरस्यति पदेति। यत्संबंधावच्छिन्नकार्यकारणभावग्रहः फ
लं तत्संबंधघटितान्वयादिग्रहः कारणमिति भावः। व्यभिचारेति तथा च कार्यतानिश्चयस्य न व्याप्तिनिश्चयरूपत्वं व्यभिचाराभानस्य दुर्वारत्वादिति भावः
। घटादाविति आलोकादौ व्यभिचारवारणाय स्वसमानाधिकरणावृत्तित्वस्य [illegible]लक्षणानुसन्नत्वं वन्ह्यसमवहितजन्यत्वमुक्तं। न चान
न्यत्वमात्रमस्तु तथा सत्यापादकविशेषणवैयर्थ्यात् त्यागे चापाद्यापादकयोर्भेदप्रसंगात् एवं च तत्र स्वत्वपरानुयोगित्ववैशिष्ट्ये वन्हित्वावधिकरणव

ग॰टी॰
१८
18

स्वारसोपि वह्निशून्यतादशायां वह्निमद्देशोन्यत्र घटेयमिचाद्य इत्यर्थः॥ आपादकेति तत्प्रतियोगिविशेषणोपादानमेव दोषः न हि तौ घटो मूलस्व
रसमग्राह्यात इति निष्टावपीति विपर्ययानुमितिद्वारा तर्कस्य न विरोधित्वं किं तु साक्षादेवेति पक्षविशेषणोपादाने न वह्निसमवहितजन्यत्वेन सि
द्धिर्यथेत्यपि द्रष्टव्या वह्नीति। इदं च वह्नितन्यवह्निसमवहितजन्यत्वयोर्भेदाद्वह्निसमवहितजन्यत्वशंकाविघटकाद्वह्नितन्यत्वशंकाविघट
नपि त्वभिमानेनाग्रे च तयोर्भेदप्रदर्शनं न विरोधकं तु शंकेति प्रकृताभिप्रायं वह्निसामान्यस्यैव प्रतिबध्यत्वात् वह्निसमवहितजन्यत्वावच्छिन्न
निश्चायकतेति। अयं निश्चयः वह्निसमवहितसत्वे धूमसत्त्वमित्यन्वयादिग्रहाधीनः॥ तत्कोटित्वेति तत्कोटितावच्छेदकावच्छिन्नविधेयताप्रयो
जकापाद्याभाववन्निष्ठयोग्यतावगाहितापादृशतर्कजनकतावच्छेदिकातादृशत्वस्यार्थः॥ व्यतिरेकि आपादकाभावनिष्ठापाद्याभावव्यापकत्वस्य
अन्वयिन्यापाद्यनिष्ठापादकव्यापकत्वस्य चापादकाभावसाधने क्रमेणान्वयव्यतिरेकव्याप्तित्वात्। नेन धूमाभावरूपापाद्यस्यैकत्वेन वह्नित्वावच्छिन्न
विधेयताप्रयोजकत्वाभावप्रतियोगित्वेपि न धूमजनकतेजस्त्वेन सन्निमपंक्तसंगतिः॥ यद्वा पर्वतो यदि निर्द्रव्यः स्यात्तदा द्रव्यसामानाधिकरण्य
विशिष्टगुणाभाववान् स्यादित्यस्य द्रव्यमात्रपर्यवसायिनो वन्ह्यभावशंकापनायकत्वापत्तिरतो धर्मानुधावनं। एवमपि तेनेत्यादिदोषभयान्महा
नसीयवन्ह्यभावापादकतर्कस्य वह्नित्वावच्छिन्नसाधकापाद्याभावकत्वाभावेपि वह्निसामान्याभावशंकापनायकत्वाद्विपर्ययानुमानादिति ग॰म॰
वक्ष्यति। अभावरूपविपर्ययस्य त्वसमाधानारणीयप्रतियोगीनेति। हृदो यदि धूमवान् स्यात्तदा वह्निमान् स्यादित्यादेर्धूमघटीभयाभावसाधकवह्निघटो १८

मयाभावादिरूपविपर्ययप्रवृत्तियोग्यतापादकतया तदभावशंकापनायकत्वात् प्रतितः अवच्छेदकेति। तद्वत्प्रतियोगिकेत्यस्य कोटितावच्छेद
कत्वादेर्नतेजस्त्विलोपादानेष्णुकदोषादाहनदवच्छिन्नेति। एतेन मात्रपदानन्वयो तदाहृतिविधेयताप्रयोजके साध्यं ऽन्यथेत्यादिमात्रपद
प्रयोजनसंगतेर्दृष्टार्थ्याक्लंवनेकिं वीजमित्यनुयोगोपात्तः। आहार्येति प्रतिबध्यतावच्छेदके अनाहार्यत्वप्रवेशपदरूपावच्छिन्नेपदरूपावच्छिन्ना-
भावशंकाया विपर्ययानुमितिः प्रतिबन्धिका प्रतिबध्यतावच्छेदके तदप्रवेशे तद्रूपावच्छिन्ने तद्रूपावच्छिन्नाभावशंकायां तर्कः प्रतिबंधको ऽप्युपेयते
इत्यर्थः। अत्र नाहार्यशंकायास्तर्काद्यनीभूतव्याप्यवत्ताज्ञाने नैव निरासादाहार्यशंकानिरासस्तर्कफलं तच्चापादकताज्ञाने द्वेषेणेच्छाविघटनादि
निमित्तोक्तमयुक्तं। तथा सति एकदैवाहार्यानाहार्यशंकानिवृत्तेरनुपपत्तेः कथं चिद्विष्टसाधनताज्ञानेनपेइच्छानुवृत्तेर्दर्शितत्वाच्च केचित्तु इच्छां
तर्कादि प्रत्यप्रामाणिककार्यसाधनताज्ञानमप्रामाणिकत्वविषयकं विरोधि। अत एव द्वेषोत्पादे मानाभावात्। न चेच्छायामसत्यां कथं न द्वेषोत्पत्तिरिति
वाच्यं। तदभावप्रकारकज्ञानस्य सामग्रीविरहे तन्निश्चयोत्पत्त्यभाववदिति। तन्न। अप्रामाणिककार्यसाधनकताज्ञाने इच्छानुवृत्त्यापत्तेर्मानाभा
वाच्च। परे तु तन्निर्णये तर्काभावविशिष्टविरोधिजिज्ञासा या विरोधिविषयकत्वेन विरोधिताविरोधिविषयकज्ञानत्वमपेक्ष्यताच्च वादिन्निति वदन्ति।
तन्तुच्छं। धर्मितावच्छेदकाभावान्नवगाहित्वादेव प्रतिबंधकत्वासंभवात्। एतेन विरोधिजिज्ञासोत्तरनिर्णये तर्को हेतुः। तर्काभावविशिष्टविरोधि
जिज्ञासा वा प्रतिबंधिकेति मतमपास्तं। अभावप्रत्यक्षे योग्यानुपलब्धिर्निर्वाहकतामात्रेणानर्कोपयोग इत्यालोककाराः। तन्न। तत्र प्रतियोगिसत्त्व

ग०टी०
१९
19

व्यापकप्रतियोगिकत्वस्यपरिचायकतया तर्कानुपयोगात्। तर्कविशिष्टलाघवज्ञानस्यसामान्यतआपादकशंकायामुत्तेजकतया तर्कस्यत्वेआ
पादकाभावनिर्णयइतिमतमपिगौरवादिग्रस्तं। तर्ककारणीभूतज्ञानविषयस्यतर्कैभानमितिमतंतुआपादकशंकानुवृत्तिग्रस्तमित्येतेषांपरि
त्यागः। विशेषणाभावमादायविपर्ययपर्यवसानवारणायगुणकर्मभिन्नमिति। अवधारणात्स्यार्थइति। द्वितीयोचोऽवधारणो। यद्यपितादृशा
पाद्यकेनस्यतादृशशंकाविरोधित्वाभावोवधारणार्थइतिनातिप्रसंगापसंगो तथापिउक्तरूपंतएवच्छिन्नविरोधिताप्रसक्तिनिराकरणस्याप्य
भिप्रेतत्वलाभायतात्पर्यपदं। तत्कोटितावच्छेदकावच्छिन्नेत्यादिविवक्षायाअसंभवादाह तद्धर्मीप्रथमान्तेतिवन्ह्यसमवहितजन्यत्वसाधारण
विधेयताश्यलेविरोधित्वाभावाद्व्यभिचारइत्यतोमात्रपदं। एतन्मतेधूमजनकतेजस्त्वीनत्वादित्यादितर्कस्यवह्निमान्नवेतिशंकायाद्रव्यवान्नवेतिशं
कायाश्चविरोधित्वमेष्टत्वेपिमहानसीयवह्निमान्नवेतिशंकाविरोधित्ववारणायेवतत्तदवच्छिन्नाभावेति। यथाश्रुतजन्यत्वाभावापत्तिरपिसंभवती
त्यलाहवह्नीति। पक्षइतिअन्यथाधर्मिभेदादेवशंकासमाधानयोरनुमानादितिभावः। अनुगतत्वेतिअनंतरक्षणवृत्त्याद्यताकत्वंउभयत्रैवानंतर
क्षणोत्पन्नत्वंआद्यत्वंचस्वाधिकरणसमयध्वंसानधिकरणत्वमितिस्वसमानेतिचस्वत्वप्रवेशादननुगमः। ननुस्वाधिकरणसमयध्वंसानधि
करणसमयसंबंधस्योत्पत्तित्वे उत्पत्तिपदस्यनानार्थत्वापत्तिरतः स्वप्रतियोगिवृत्तित्वसंबंधावच्छिन्नप्रतियोगिताकध्वंसाभावविशिष्टप्रतियोगि
कसमयसंबंधत्वमनुगतोत्पत्तित्वमग्रेकर्तव्यंअतएवचोत्पन्नत्वसामान्याभावस्यापाद्यतानिर्वाहः अन्यथातत्तदुत्पन्नत्वाभावकूटस्येवापाद्यत्वप्रसं

रा म०
१९

गइति चेन्न महाप्रलयांगीकारपक्षे उक्तो स्यतिलक्षणाव्याप्तिर्महाकालवृत्तिताया इव प्रलयवृत्तितायाअपि सर्वदा सत्वेन निरवच्छिन्नत्वाद्ध्वं
साभावानवच्छिन्नत्वादिति वह्न्यसमवहितजन्यत्वस्य तत्साधारणतया तादृशानंतरक्षणे सत्वत्वं तदधिकरणक्षणवृत्तित्वस्याप्यवृत्ति
ध्वंसप्रतियोगिताकतादृशानंतरक्षणवृत्तित्वं वा चध्वंसवृत्तिध्वंसप्रतियोगितदीयसमयसंबंधसामान्यकतादृशानंतरसमयानुयोगिकसंबं
धो वा निवेश्यः। अन्यथा महाप्रलये व्यभिचारः स्यादिसननुगमो दुर्वारः तदनंगीकारपक्षे तु अगत्या गगनरूपधर्मस्य प्रतियोगितावच्छेदकत्वमतमवलं
बनीयं। यद्वा अननुगतोसत्तिपक्षे इदं अनुगततत्तत्क्षणे निदर्शनांतरं भविष्यति। तच्छून्ये इति तेन नांतरीयकवह्निकेन व्यभिचारः। पत्तु पर्वतरूपे
व्यभिचारवारणाय इदं वह्निशून्यार्थकं। न चैवमपि पर्वतस्य वह्निशून्यत्वाभावाद्व्यभिचारः। वह्नेरपि वह्निशून्यतया तज्जन्यतापदे न वह्निजन्यताया
स्तद्भिन्नजन्यतायाश्च लाभाद्वह्निपदवैयर्थ्यापत्तेः। स्वाधिकरणदेशावच्छिन्नवन्ह्यभाववद्वृत्त्यन्यतरजन्यत्वस्य वाच्यत्वात् तादृशजनकपर्वतस्य
तथाविधदेशावच्छिन्नवन्ह्यभाववत्तात् वह्निजन्यालोके व्यभिचारवारणाय तत्र वह्निनिवेशान्न तद्वैयर्थ्यं। परं तु तत्र संयोगेन स्वाधिकरणनिवे
शाद्व्यभिचारप्रसक्तिरिति तन्न। जन्यताघटकसंबंधेन स्वाधिकरणतानिवेशे तत्र व्यभिचारासंभवात्। नांतरीयकवह्निकवटे स्वाधिकरणदेशावच्छि
न्नवन्ह्यभाववत्क्षणोत्तरक्षणोत्पन्नत्ववह्निजन्यत्वान्यतरशून्यत्वे न व्यभिचारासंभवाच्च। वन्ह्यवृत्तीति। वन्ह्यवृत्तित्वविशिष्टवह्निभिन्नवृत्तिताश्रय
शून्यजन्यतात्वस्य वह्निभिन्नजन्यतासाधारणतया तत्कोटिमात्रापर्यवसानं। एवं वह्निभेदवह्नित्वशून्यभेदोभयाभावरूपान्यतरत्वोक्तावपि बोध्यं। क

ग० टी० ल्पहृदये प्यन्यतरत्वसमानाधिकरणो वजनकमाववृत्तिकातद्ववच्छेद्यजनकतायाअप्रसिद्धेः। एवं किंचिज्ज्ञन्योनस्यादित्याद्यावपि। किंचिदित्यापा
१० द्यभेदं वक्तुं तत्तज्जन्यत्वाभावकूटस्य ग्रहः। विशेषाभावकूटस्य सामान्याभावव्याप्यत्वात्। जन्यतात्वं चानुगतमखंडोपाधिः। यदि तत्त्वोद्दिष्टान्तत्रपर्यव
सायिता तद्धर्मावच्छिन्नविधेयताप्रयोजकाधायाभावकत्वं तदा हृतद्रूपेति। यदि तद्धर्माश्रयमात्रवृत्तिविधेयताप्रयोजकापायाभावकत्वं तदा तद्रूप
20 वदिति। धूमजनकतेजस्त्वावच्छिन्ननिरूपितव्याप्तेरेव तथाविधतेजस्त्वावच्छिन्नविधेयताकसिद्ध्या वह्निमान्नवेति शंकापनयादिति भावः॥ ता
दृश्यपाधाभावनिष्ठ्या। तद्धर्मव्यापकत्वं भेदवृत्तित्तत्र नव्यमते विधेयता तद्धर्मावच्छिन्ना न तु प्राचीनमते इति भेदः। वास्तविकपक्षधर्मतया बा
धितार्थसिद्धावपि एकविशेषबाधादिनेव विशेषणतोः परविशेषणांतरस्य सिद्धित्वन्मात्रवृत्तिविधेयतावेत्साशयेनाह प्रकृतपक्षेइति। उपस्थितिर्नस्म
तिः किंत्वनुभवोपीति संशयसंग्रहापत्तिरतो निश्चितेइति। अनाहार्यप्रामाण्यपज्ञानानास्कंदितनिश्चयोनिवेश्यः। यत्किंचिदितिविशिष्टपरामर्शा
द्यसत्त्वप्रदर्शनाय। योग्यपज्ञाचविषयतया सिद्धिजनकतावच्छेदकं विशेषतो व्याप्त्यादिकमिव सामान्यतो व्याप्त्यादिकमपि यथा चाविपर्ययानुमिति
द्वारैवनिवर्त्तकत्वे तत्रेतरबाधावश्यकत्वान्न व्यतिरेकः। विशिष्टाभावत्वाक्रांतस्य विशेषणाभावविशेष्याभावाभ्यामनतिरिक्ततया विशिष्टापादक
स्यतदुभयसाधारणधर्मावच्छिन्नप्रतियोगितयोपाध्यायमते एकविशेषबाधात्मकपक्षविशेषणाभावस्यकमिस्यत्र दृष्टांतं सर्वमतसिद्धानुगतरू प० म०
पावच्छिन्नाभावापादकतर्करूपस्य लांतरेऽपि तत्ताद्रूप्यपक्षविशेषणांशप्रसादयतिपर्वतइति। भौममभिन्नवह्निमद्अन्यपर्वतस्थतर्कपक्षत्वेपिव्या २०

पापाभाववत्ताज्ञानाधीनमुद्रूपवर्तनपक्षकापादकाभावानुमितौ व्यभिचारात्प्रकृतपक्षतावच्छेदकेति पर्याप्तिर्बोध्या। अत्र तद्रूपा विधापा
दकाभावानुमित्तेर्यादृशशंकानिवर्त्तकत्वं तर्कस्य तादृशशंकानिवर्त्तकत्वनियमे वह्निव्याप्याभावापादकतर्कस्य वह्न्यभाववत्त्वशंकानिवर्त्तकत्वा
पत्तेः प्रकारतानियमउक्तः धूमाभावानुमिताविति। ननु यत्र वह्न्यभाववत्त्वं तत्र धूमाभावः यत्रालोकाभाववत्त्वं तत्र धूमाभाव इत्युक्ततर्कप्रयोजक
व्याप्यवगाहिवह्न्यभाववद्धूमोभयवत्ताज्ञानजन्यालोकानुमितौ वह्नित्वावच्छिन्नप्रकारताविरहाद्व्यभिचारः। यदि चासत्तिमतिबंधके इत्युपा
दानान्नायं दोष इत्युच्यते तदाविनिगमकाभावादेवापादकाभावविधेयकत्वनिवेशस्यावश्यकत्वं तथा च कथमत्र व्यभिचार इति चेत्सत्यं। विशे
षणाज्ञानविधया यत्र धूमस्तत्र वह्निरित्युक्ततर्कप्रयोजकव्यतिरेकव्याप्तिज्ञानजन्यायां धूमव्यापकवह्निसमानाधिकरणधूमजनकतेजस्त्वि
त्वरूपापादकाभावानुमितौ वह्नित्वावच्छिन्नप्रकारताविरहादुक्तनियमासंभव इति तद्विशेषणावश्यकत्वात्। न चैवमपि तादृशतेजोव्याप्यधूमवा
निति परामर्शीयतादृशव्याप्यापाद्याभावोभयावगाहित्वात्कथं दोषनिरास इति वाच्यं। प्रकृतपक्षधर्मितानिरूपितप्रकृतापाद्याभावावगाहितायाः
तादृशव्याप्यवच्छेद्यताउक्तत्वात्। घटकीभूततर्कप्रयोजकव्याप्तेस्तादृशापाद्याभावावगाहितानवच्छेदकतयाऽदोषात्। न च धूमव्यापकवह्निसमा
नाधिकरणधूमवत्तापरामर्शीयव्याप्यवच्छिन्नापाद्याभावावगाहित्वेपि व्यतिरेकिणि वह्न्यभावो धूमाभावव्याप्यः अयं च धूमवानित्यादौ तदसंभ
व इति वाच्यं। वह्न्यभावव्यापकधूमाभावप्रतियोगिधूमवानिति विशिष्टवैशिष्ट्यावगाहिज्ञानमादाय नियमस्योपपादनीयत्वात्। ननु यत्र यत्र

यत्किंचिदापाद्यापादकव्याप्यत्वादित्य

ग॰शी॰ तदसमवहिताजन्यत्वविशिष्टतदसमवधानकालीनतत्तद्व्यापारेणफलवत्कारणकत्वं तत्र तत्र तत्कारणकत्वमिति सामान्यव्याप्तिस्थले नैतत्त्रि

२१ यमसंभव इति चेन्न। प्रकृतापादकतुल्योपस्थिततत्तदापादकधर्मिकप्रकृतापाद्यतुल्योपस्थिततत्तदापाद्यव्यभिचारग्रहाभावविशिष्टतत्तदापाद्य

तत्तदापादकोपस्थितिरूपप्रतिबंधकाभावरूपंप्रकृतापाद्याभावतुल्योपस्थिततत्तदापाद्याभावनिष्ठप्रकृतापादकाभावतुल्योपस्थिततत्तदा

पादकाभावव्यभिचारग्रहाभावविशिष्टतत्तदापादकाभावतत्तदापाद्याभावोपस्थितिरूपप्रतिबंधकाभावरूपंच (यत्किंचिदापाद्यापादकव्याप्यत्व)

21 त्वादि यत्प्रकृततर्कौपयिकं तद्विशिष्टप्रकृतपक्षधर्मिकप्रकृतापाद्याभाववत्ताज्ञानाधीनानुमितिं निवेशय नियमान्तरस्यावश्यकत्वान्न दोष इति यत्र

वन्ह्यभाववत्तत्र धूमाभावः यत्र द्रव्याभाववत्तत्र धूमाभावः पर्वतो निर्वह्निरिति बाधजन्यापादकाभावानुमितौ वह्नित्वावच्छिन्नप्रकारताविरहादुक्त

मसति प्रतिबंधक इति। अभौमवह्निबाधावतारदशायां यत्र धूमस्तत्र वह्निरित्युक्ततर्कप्रयोजकव्याप्तिज्ञानजन्यानुमितौ भौमवह्नित्वावच्छिन्नप्रका

रतासत्वेनप्युक्तवह्नित्वावच्छिन्नप्रकारताविरहेपि वह्निमात्रवैतिशंकायनयप्रकारः प्रागुक्तोऽवसेयः। यद्रूपेति प्रकृततर्कौपयिकव्याप्यवगाहित्व

मनुभूयते न तु प्रकृतपक्षधर्मिकत्वं समानधर्मिकशंकाविरोधित्वसंभवेन प्रयोजनाभावात्। अभौमवह्निशून्यः पर्वत इति निश्चयाविशिष्टोक्ततर्क

स्यशंकाप्रतिबंधकत्ववारणाय सत्यंतनिवेशः। सहकृतां तदानेऽप्युक्तनियमेव्यभिचारं वदतां मतमाह धूमत्वेति। अत्रैतदाग्रहाविरोधादिसंतकं उ गम॰

लितं। अत्रेच्छाद्द्रव्यान्ध्रितागुणत्वादिसाध्यकादौ विशिष्टव्याप्तिगतवृत्तित्वबाधकूटरूपसद्धेतुकाविशदात्मवृत्तित्वानुमितिरिति मतमतरूपेदमभिहितमस्ति २१

तः

द्धं तमनुरुध्यो गौरवकल्पमवगायेतिस्थत्र पक्षे इति। इतरबाधस्येति। ननु पुरोवर्तिविशेष्यकवह्नित्वप्रकारकज्ञानत्वावच्छिन्ने वह्नित्वाभावव
त्तिवह्नित्वप्रकारकज्ञानत्वावच्छिन्नव्याप्यवत्तापरामर्शाद्वह्नित्ववत्तिवह्नित्वप्रकारकत्वेन प्रामाण्यानुमितेः प्रसंगस्य मरोत्वीकाराद्युक्त
नियमासंगतिरिति चेन्नासामान्यज्ञानसहकृतात्लौकिकविशेषबाधसामग्रीश्रव्यापकमनुमापयतीति सामान्यधर्मावच्छिन्नानुमितिसामग्रीसहि
तेतरबाधस्य तदनाक्रान्तधर्माभासकत्वनियमे कथं विरोध इति। वह्निजन्यत्वत्वविरोधीति तद्रूपावच्छिन्नभिन्नत्वेऽन्वयः यद्धर्मावच्छिन्नासिद्धिः फ
लं तद्विपरीतघटितसामान्यधर्मावच्छिन्नाभावत्वेन निश्चयस्य परामर्शसहकारित्वात् तावन्न्यूनसमवहितजन्यत्वाभावस्य वस्तुतो वह्निजन्यत्व
भिन्नं श्रयपचविशिष्टाभावत्वाश्रयं य[illegible]न्यूनसमवहितजन्यत्वं न तु प्रतियोगिकत्वेपि तत्प्रतियोगितावन्न्यूनसमवहितजन्यता
त्वेनैवावच्छिद्यते न तु दर्शितभेदविशिष्टविशिष्टाभावत्वेनेति न तन्निश्चयस्य सहकारित्वसंभव इति। ननु वन्न्यूनसमवह्नितजन्यत्वत्वं चान्यजन्यत्वा
न्यविशिष्टाभावत्वसमनियतमिति तदवच्छिन्नबाधनिश्चयस्य कुतो न सहकारित्वमित्यत आह तथा सत्यनुमितित्वस्यानुमितिगंधत्वसमनियततया
तदवच्छिन्नबाधनिश्चयस्यापि सोऽमत्वेन गंधानुमापकत्वं प्रसंजयति न हीति। न च तदितरत्वप्रसिद्धाशेषविशेषबाधसहितस्य सामान्यतो दृष्टस्य प्रसि
ध्यमानप्रसिद्धप्रकारिताप्रयोजकत्वनियमात् वन्न्यूनसमवहितजन्यत्वसामान्याभावनिश्चयस्यापि सहकारित्वं दुर्वारमिति वाच्यं। यादृशसामग्र्या
यत्किंचिदनुमितावप्रसिद्धिस्थले तद्धीग्रहेपि तन्न दर्शितसोऽमबाधग्रहवशादनुमितिः तादृशसामग्र्यास्तत्र सिद्धिस्थले तद्बाधाग्रहदशायां सत्त्वादनुमिति

धा१

प्रसंगः। तस्यासिद्धेः प्रतिबंधकत्वं तु न संभवति तथा सति तद्व्याप्यग्रहे पि तथानुमित्यनापत्तेरिति वाधग्रंथे विस्तरः। इष्टपर्यवसानं नितरुस्मान्निष्ठ
ग॰ टी॰ २२ पर्यवसानं चापादयति अपि त्विति गंधत्वेनेति। तद्विपरीतविशिष्टसामान्यधर्मावच्छिन्नविधेयताकानुमितौ तद्धर्मावच्छिन्नबाधनिश्चयस्य स
22 हकारित्वादिति भावः। विपरीतं तत्सामान्याभावत्वं तदवच्छिन्नभेदो वा। एवं चैवकारेण पृथ्वीगंधत्वेनेत्यस्य व्यवच्छेदः॥ यद्यपि वह्निसमवहित
जन्यत्वविरोधीत्यादेर्व्यर्थत्वे वह्निजन्यत्वविरोधीत्यादिकथनमसंगतं तथापि वह्निजन्यत्ववह्निसमवहितजन्यत्वयोरैक्यासंभवे पि व्याप्तिग्राहक
तर्कोपयोगितानिर्वाहाय वह्निसमवहितजन्यपदस्य वह्निजन्यत्वार्थकत्वेन वन्ह्यसमवहितजन्यत्वविशिष्टं वन्ह्यजन्यत्वमापादकं पारिभाषि
कजन्यत्वाभावव्याप्यापाद्यतयानां तरीयवह्निकेन व्यभिचार इति वन्ह्यसमवहिताजन्यत्वस्यापाद्यप्रतियोगिविशेषणत्वं व्यर्थमित्येव कुतो न मत
निष्कर्ष इत्याशंकावारणायेत्यमुक्तिः। वह्निसमवहितजन्यत्वविरोधीत्येवपाठ इति तु केचित्। अप्रसिद्धेरिति। नन्वेवं सुरभिभिन्नगंधबाधग्रह
दशायां सुरभित्वेन गंधानुमितिर्न स्यात् सुरभिभिन्नगंधत्वस्यासुरभित्वसमनियतत्वेन गुरुतया तदवच्छिन्नाभावाप्रसिद्धेरिति चेत् अत्र प्रामाण्य
ज्ञानानास्कंदितभ्रमसाधारणेन तद्बाधनिश्चयस्य हेतुत्वे पि सुरभिभिन्नगंधाभाववान्न वा घटो यदि गंधाभाववान्स्यात्तदा न पृथिवी स्यादित्या
देरप्रसिद्धपक्षविशेषणकतर्कस्य वह्नेः संभवे पि च तांत्रिकैस्तादृशविशेषणं न प्रापितुं शक्यमित्यस्याप्युपपत्तेर्व्याख्यानाकौशलप्रसंगेन वस्तु रा॰म॰
गतेरेवानुरोद्धव्यता। सामग्र्याः क्षणान्तरत्वं क्षणस्य स्वाधिकरणक्षणाव्यवहितपूर्वत्वे एवेति लाघवमनुद्धाह तादृशोक्तिः। वह्निजन्यत्वाव्या २२

यत्वेनेति तदनवच्छेदकत्वेनेत्यपि द्रष्टव्यं। तथा च तद्व्याप्यत्वाद्यंशेऽशांत स्यानुभूयमानानुमित्युपपादनायोगः। तत्रि स्वपादे वेति। धूमो यदि व
ह्निव्यभिचारी स्यात्तदा वह्निसमवहितजन्यो न स्यादिति तर्कस्याप्यनपेक्षोक्ता। यदुत्पद्यते इति संयोगेन जन्यमित्यर्थः। अनेनैकं कपालं वह्निमद्य
ं च वह्निशून्यं तत्रोत्पद्यमाने घटे हेतुतावच्छेदकसंयोगे न वह्निसमवहितजन्यत्वासत्वेपि न क्षतिः। ननु तादृशविशेषणविशिष्टजन्यत्वे धूमव
त्तिता निश्चयो व्याप्तिग्रहार्थमपेक्षितः स चासंभवी धूमे हेतुक एव भविष्यतीति शंकायाः दुर्वारत्वात् तादृशशंकानिवर्तकस्य वह्निसमवहि
तजन्यतायाह कृतर्कोऽस्त्विति। नीलधूमादिवत्तादृशविशेषणविशिष्टवह्निसमवहितजन्यत्वमपि व्याप्तिग्राहकं तर्कमेवेति च तर्कापेक्षेत्यत आह एवं
धूमत्वेति। अवच्छेदकावच्छेदेन लिंगानुमितावच्छेदकावच्छेदेन लिंगनिश्चयस्य हेतुत्वादिति भावः। तर्कं विनापीति धूमांतराधिकरणे वह्निशू
न्यत्वशंकायाश्च विरोधित्वादिति भावः। संभवेनेति पक्षलक्षणत एवेति शेषः। अवच्छेदकावच्छेदेन वह्निसमवहितजन्यत्वशंकायां प्रसक्तसामग्र्येव प्रतिबं
धिकेति भावः। वह्निजन्यत्वमात्रेति यत्र वन्ह्यसमवहिताजन्यत्वविशिष्टपारिभाषिकजन्यत्वं तत्र वन्हिजन्यत्वमिति व्याप्तेस्तर्कप्रयोजकतया तदधी
न वन्हिजन्यत्वानुमितिमादायैवोक्तनियमानिर्वाहः। यत्र वन्हिजन्यत्वाभावस्तत्र तादृशजन्यत्वाभाव इति तर्कप्रयोजकव्याप्तिधीनायास्तदभावाभावत्वे
नानुमितेर्वा वह्निजन्यत्वाप्रकारकत्वेपि न क्षतिः व्याप्तिभेदेन विषयभेदात्। इति दिक्। वन्ह्यसमवहितस्य हेतुत्वादाह वह्नीति स्वजनकत्वस्याप्यवहितपू
र्वक्षणावृत्तित्वाच्च तादृशवन्ह्यभाववत्क्षणे पूर्ववर्तितानिवेशेनैवोपपत्तेः सामग्र्यादिनिवेशानिबंधनं गौरवमत आह एवं चेति। स्वपदं च न धूमसामान्यपरं

ग॰ टी॰ महानसीयादिधूमोत्पत्तिनिष्ठाकृष्टत्वस्य धूमवत्त्वत्वावच्छेदेन वन्ह्यभाववत्त्वात् साधिकरणत्वं च विशेषणतां॰ अन्यथा तादृशकृष्टत्वस्य प्रदेशान्तराव

२३ च्छिन्नमहानसीयावच्छेदेन वह्न्यभाववत्त्वाद्धूमे विशेषणतासिद्ध्यापत्तेः स्वेतिमूलशेषोपिस्वावारणायपदितिवीक्षाकार्या। घटादौ तिष्ठन्ति शरस्य तादृशा

23 यां वह्निप्रदेशोत्पन्नघटादीस्वर्थः। इदमपि महाप्रलयांगीकारे तदनंगीकारे विशेषणताविहिर्वैयर्थ्यात्प्रमन्ततापात्तादिति। केचित्तु जन्ये जन्ये जन्ये चेति चका

रस्यानंतरोपक्रवह्निके इत्यनंतरं योजनीयतया जन्यपदे न वह्न्यव्यधिकरणत्वाभावान्नायं दोषः। अन्यथानंतरोपक्रवह्निकस्य जन्यस्यैवासंभवाज्जन्ये चेत्य

स्यासंगतापत्तेः। किंचापायव्यतिरेकनिर्णयस्य पक्षेतर्के पूर्वमपेक्षिततया तत्र च विशेषणादलघटकस्वाधिकरणतायां तन्निर्णयासंपादकस्य किंचि

त्संबंधावच्छिन्नत्वविवक्षणस्य दुष्टत्वात् तेन विवक्षितसंबंधावच्छिन्नत्वस्यैवादरणीयतया संयोगेनावर्त्तमानजन्यत्वपादो व्यभिचारस्य जागरूकतया तदप्र

दर्शनेन न्यूनतापादकत्वात् तद्द्वयस्यापि पक्षेपि तद्वैयर्थ्यकर्तुर्दीधितिकारस्य दुष्परिहरत्वादिति वदंति। तदेतदयेशत्वं जन्यानंतरोपक्रवह्निकपदाभ्यां

यावह्निरूपोपादानरूपाभ्यां वह्निसमानासमानाधिकरणत्वविशिष्टघटयोरूपादानस्य ग्रंथकारीतिविरुद्धत्वात्॰ तयोश्च वह्निशून्यतादृशापांव

न्हिप्रदेशाउत्पन्नत्वेन सामान्येनोपादानस्य न्याय्यत्वात् जन्यपदस्य वह्न्यव्यधिकरणत्वविशिष्टवाचकत्वाच्च यथाश्रुतजन्यत्वस्य दूरदूषकताया एव

वयुक्तत्वात्॰ किंचेत्यादिकमप्यसंगतं। पतत्संबंधावच्छिन्नवह्निजन्यत्वाभावव्यापादकस्तत्संबंधावच्छिन्नजन्यत्वाभावव्यापाद्यः अन्यथा व्यभिचारव्या ग॰ म॰

वर्त्तकवह्निजन्यत्वसिद्ध्यनापत्तेरिति यथाश्रुतस्यासंयोगेन जन्यत्वस्य निवेशोपि रूपादो व्यभिचारवारणासंभवेनानंतरोपक्रवह्निकात् तथावनस्य पारिभा २३

षिकजन्यत्वविवक्षोपपादकत्वात् जन्य इति दीधितेः । पिविवक्षितसंबंधावच्छिन्नजन्यत्वरूपार्थस्याभिप्रेतत्वात् किंचांतरमवकाशाधीति कोशानु
रोधेनांतरीयकपदस्याव्यवहितप्राक्क्षणत्वात् अपरस्यार्थकतया तदन्यवन्हिकत्वेनेव वन्ह्यधिकरणघटस्यापि लाभसंभवात् जन्ये चेत्स्वस्यैवे
पर्यंतवापि दुर्वारमिति ग्रंथकृदभिप्रायतत्तद्वैयर्थ्याद्वारीतिरेवाश्रयणीयेति स्वमते वन्ह्यधिकरणघटादौ व्यभिचाराभावेनांतराननुगर्थप्रवेशप
याचष्टेनांतरीयकइति । वन्हेर्धूमादेर्नांतरीयकत्ववारणाय स्वोत्पत्त्यर्थमनपेक्षितोपीति । तथा च योगरूढोयं । एतेनापादकं स्वाव्यवहितेत्यादिनास्वसं
तपासंभाधिकजन्यत्वाभावस्याध्वन्यतेदेवादिति तस्य सकलघटपूर्ववर्तित्वाभावेन तद्व्युदासे अन्यथासिद्धत्वार्थः । वन्ह्यभाववत्क्षणवृत्तिर्यावत्क्षणकत्व
संत्वान्नांतरीयकवन्हिकेदोषताववस्थध्वन्यतेदेवादिति । तस्य सकलघटपूर्ववर्तित्वाभावेन तद्व्युदासेन्यथासिद्धत्वार्थः । वन्ह्यभाववत्क्षणवृत्तिर्यावत्क्षा
रणकत्वस्यान्नांतरीयकवन्हिके दोषतादवस्थ्यमतः स्वाधिकरणदेशावच्छिन्नत्वमुक्तं । संबंधसामान्यरूपत्वेतादृतादवस्थ्यमिति । यद्यपि स्वस
मानाधिकरणत्वस्वनिरूपकाधिकरणतावदव्यवहितपूर्वक्षणकत्वोभयसंबंधेन वन्ह्यभावाधिकरणतावच्छेदकताविशिष्टान्यत्वं स्वावच्छेद
कतावद्वृत्तित्व स्वाश्रयाव्यवहितपूर्वक्षणकत्वोभयसंबंधेन वन्ह्यभावाधिकरणताविशिष्टान्यत्वं वा तत्त्वार्थः । पर्वतस्य धूमव्यवहितकालनिष्ठा
भाववन्ह्यभावाधिकरणतायाश्च वच्छेदकत्वेपि तद्व्यवहितप्राक्क्षणनिष्ठाया तस्या अनवच्छेदकत्वात् । स्वाधिकरणतावच्छेदकवृत्तित्व स्वाश्र
याव्यवहितपूर्वक्षणकत्वोभयसंबंधेन वन्ह्यभाववदन्यत्वं तु न तदर्थः वन्ह्यभावस्यैकत्वेन धूमेप्रसक्तेः । तादृशाधिकरणतावदव्यवहितपूर्व

ग० टी०
२४
24

स्यणकत्वं च तदधिकरणावृत्त्यंशो त्यत्यधिकरणासणोत्यन्तत्वं कथमन्यथा वह्नेरेवमविष्यतीत्यादिशंकोपपत्तिः। वह्निशून्यधूमाधिकरणासंभा
वनापाममपिस्वाधिकरणदेशावच्छिन्नवन्त्यभाववत्त्वाव्यवहितप्राक्क्षणकत्वरूपपरिचायकवशेन धूमव्याहतत्स्येव घटादिमात्रवृत्तित्व
स्योपादानं अत एव धूमे तत्ताभावकूटनिवेशेऽपि एव च स्मात् न धूमवृत्ति तत्तत्सधूमे दर्शितपरिचायकाप्रसिद्धेः। अस्माकं तु तत्संभावनयातच्छंको
पपत्तिः। एवं पारिभाषिकजन्यत्वमपि वन्त्यभावाधिकरणतावच्छेदकताविशिष्टत्वं वैशिष्ट्यं स्वसमानाधिकरणत्वस्वनिरूपकाधिकरणता
धिकरणकालवृत्तितादृशपावकारणकत्वोभयसंबंधेन वन्त्यभावाधिकरणताविशिष्टत्वं वा वैशिष्ट्यं च स्वावच्छेदकवृत्तित्वस्वाधिकरणक्षणवृ
त्तितादृशपावकारणकत्वोभयसंबंधेन एवं चावश्यमेतेषामनुगमकारणं धूमस्येत्यवधारणोपयोगः। अन्यथा परिचायकांशस्य पार्थक्ये घटक
तया तदनुपयोगात्। तथा च प्रकृते परामर्शः संसर्गत्वे मानाभावात् कूटनिवेशः। परं तु यावत्तद्व्यक्तित्वमुपस्थितं तावदभावकूटमेवापाद्यमन्यथा
ऽऽपादनासंभवात्। अवह्नेरेवमविष्यतीति शंकायाश्च धूमे प्रसिद्धत्वात् त्वन्मते प्यकथंचित् धूमनिष्ठतद्व्यक्तित्वकोटिकत्वमादृत्य वीसंगमनं तत्तद्व
ह्नि समानाधिकरणवन्त्यभाववत्तत्तदव्यवहितप्राक्क्षणकत्वं चेद् यथार्थतदापि कथंचिदेव संगमनं तेनापाद्याप्रसिद्धाविशेषस्य योगादिति न
दोषः। पद्यपि धूममात्रनिष्ठतत्ताभावो पि वन्त्यजन्यत्वव्यापकइति कूटनिवेशनमनर्थकं। न चालोकादिमात्रनिष्ठतत्ताभावानां वन्त्यजन्यत्वव्याप
कत्वात् तन्मात्रापत्ताविष्टापत्तिरतः कूटनिवेशनमर्थवदिति वाच्यं पक्षीभूतधूममात्रनिष्ठतत्तदुपस्थितिदशायां तन्मात्रापत्तावुक्तदोषः स्यादिति तत्त

एम०
२४

त्वनिश्चयमापाद्यव्यतिरेकनिर्णयमुद्भ्यापादेस्यैव तर्कप्रवृत्तेर्बीजतया कूटनिवेशवैयर्थ्यात् तथापि वह्निजन्यालोकादेर्लिंगत्वे तत्पक्षकतर्कानुरोधेना
लोकादिनिष्ठजन्यत्वाभावस्यापाद्यत्वं वाच्यं तेषां च सर्वेषामेकदैव वह्निजन्यत्वाभावव्यापकत्वोपदर्शनाय कूटपदनिवेशनं न च एवं धूमादौ तत्प्रसि
द्धिर्दुर्घटेति पूर्ववाक्ये व्याप्यादिपदोपसंदानं संगतिः। अन्यथा धूमनिष्ठत्वेन स्वप्रसिद्धेरनपेक्षितत्वात् तदुपादानमसंगतं स्यात्। आपाद्यस्य साध्यतुल्य
तया तत्राधिकविशेषणाप्रवेशनेन सातिमावहतीति धूमपक्षकतर्कस्य कूटापाद्यत्वं सामंजस्यमेव। एतदभिप्रेत्यैव जन्यत्वानिवेशोभिहितः। अवधार
णामपि परिचयार्थमेवावस्तुतस्तु वह्न्यभावाधिकरणतायास्तदवच्छेदकतासमानाधिकरणत्व तदाश्रयाव्यवहितपूर्वक्षणकत्वोभयाभावकू
टः संसर्गतार्थः। एवं वह्न्यभावाधिकरणतायास्तदवच्छेदकवृत्तित्वविशिष्टतदाश्रयक्षणवृत्तित्वाद्यावत्कारणकत्वं जन्यत्वं तेन न शंकासंगतिरवधारणो
पयोगश्चाजन्यत्वनिवेशनिराकरणं तु चिंत्यं न चैवं दीधितिकारोक्तजन्यत्वस्यैव कुतो न निवेशः तस्य तथाविधयावत्कारणकत्वरूपतया प्रतियोगि
तावच्छेदकगौरवात् एकैकाधिकरणतागर्भस्य तादृशैकैकजन्यत्वस्य तादृशसंसर्गतार्थविशिष्टस्याभावकूट एवापाद्यः। संसर्गतार्थस्य समुदायगर्भ
तया महागौरवाद्दुर्ज्ञेयत्वाच्च तदजन्यत्वं वेत्युक्तं। अत्र च वह्न्यभावाधिकरणतावैशिष्ट्यमनुगतं भेदप्रतियोगितावच्छेदकं वैशिष्ट्यमवच्छेदकतासंबं
धेन स्वाधिकरणे संयोगसंबंधावच्छिन्नवृत्तित्वकालिकसंबंधेन स्वाधिकरणक्षणे स्वाव्यवहितपूर्वत्वसंबंधेन संबंधित्वोभयसंबंधेन च अन्यथा। स्व
वृत्त्यनियामकत्वेपि न प्रतियोगितावच्छेदकताघटकसंबंधत्वासिद्धिः। एतेन भेदनिवेशोऽधिकप्रतियोगिनिवेशाद्गौरवमित्यपास्तं। तथाविधव

ग०टी० न्ह्यभावाधिकरणतावैशिष्ट्याभावनिवेशे तादृशवैशिष्ट्यवत्त्वविशिष्टानां तदवच्छेदेन तदभावसंभवेन भेदनिवेशस्यावश्यकत्वात्। एवं वन्ह्यभावाधि
२५ करणताविशिष्टत्वं जन्यत्वं विशिष्टत्वं त्वावच्छेदकवृत्तित्वस्वाश्रयक्षणसंबद्धत्वोभयसंबंधेन संबद्धत्वं स्वीययावत्कारणावच्छसंबंधेनायाद
25 शघटस्येति। वह्निनां तदीयकघटविशेषस्येत्यर्थः। स्वीयेति। स्वावच्छेद्यत्वं स्वरूपसंबंधविशेषः। यावत्कारणाधिकरणस्थूलकालमादायोक्त
दोषात्क्षणनिवेशः। तज्जवह्नीति। तज्जवह्निसमवधानप्रागभाववत्त्वाव्यवहितपूर्वक्षणकं यत्तत्त्वाभाववत्त्वेनेत्यर्थः। भाविवह्निकारणयत
न्नवह्नित्वेन निवेशः। कश्चिदिति। प्रागभावनिरूपकारणात्। फलेति। न च वह्निसमवधानकालोत्पत्तिकार्द्रेंधनादीनां धूमं प्रतिफलोपधायकत्वसं
भवात् तद्व्यतिरिक्तयावत्कारणस्य वह्न्यसमवधानकालीनत्वाभावादापाद्याप्रसिद्धिरिति वाच्यं। आर्द्रेंधनेन वह्निमुत्पाद्यैव यो धूम उत्पाद्यते तत्रै
वापाद्यव्यतिरेकप्रसिद्धेरवच्छेदकावच्छेदेन तर्कस्याभावात्। सामानाधिकरण्येन तर्के तु तत्तदार्द्रेंधनभिन्नत्वविशेषणेनावच्छेदकावच्छेदे
न तत्प्रसिद्धिः। आर्द्रेंधनजैकवह्निसमवधानतत्कालोत्पन्नार्द्रेंधनजवह्न्यंतरासमवधानाभ्यामपि धूमजननात्तत्र तादृशार्द्रेंधनस्यापि फलो
पहितकारणतया तस्य वह्न्यसमवधानकालीनत्वं दुर्घटमिति तत्तदिति वीप्सा। न च वह्निव्यापारकालीनत्वावच्छिन्नभेद एव विवक्षणीयः। नांत
रीयकवह्निकचरमकारणस्य तत्कालीनतया तदन्ययावत्कारणस्य वह्न्यसमवधानकालीनतया मूलशैथिल्यात्। वस्तुतस्तु स्वोत्पत्तिप्रयो गम० २५
जकप्रत्यासत्तिविशिष्टेति विवक्षणैव वह्निसमवधानकालोत्पत्तिकार्द्रेंधनवारणसंभवादाशंकैवाप्रसिद्धेति। तत्समवधाने तरत्वमिति। न च धूमजन

कतद्व्ययवद्व्यसंयोगस्यवह्नितत्समवधानेनास्यवच्छ्यसमवधानकालीनत्वाभावाद्धूमेऽपि कथं विशेष्यदलसत्त्वमितिवाच्यं।धूमोत्पत्तिप्रयोज
कवह्निव्यापारपरंपरायाएव तत्समवधानपदेनविवक्षणाद्धूमावयववह्निसंयोगस्यैवधूमावयववह्निसंयोगादेरपिवह्निसमवधानत्वेन
तदन्यत्वाभावात्।यत्रकपालोत्तरंतीव्राग्निसमवधानेनव्यापारितदंडेनतुन्नाच्चक्रात्कपालसंयोगोत्पत्तिस्ततोवह्निनांतरीयकोघटस्तत्रकपालसं
योगादीनांवह्निव्यापारतयातद्भिन्नयावत्कारणानांवच्छ्यसमवधानकालीनत्वाद्व्यभिचारइतिधूमोत्पत्तिप्रयोजकेति।अतएवत्वोसत्तिप्रयोजक
त्वंनोक्तंतेषांतादृशघटोत्पादकत्वात्।कचित्तथैवपाठः।सिद्धांतकोटिमाशंकतेनचेति।वह्निसंयोगाभावःकालिकसंबंधावच्छिन्नःपदेति।दिनांत
रेभूतलादेरनेष्यमाणतयाघटस्याधिकरणतानियामकसंयोगादेःसत्त्वेनाद्यतनकालवृत्तित्वावच्छेदकत्वापत्तिरतोपदेति।अद्यगृहांतरेघ
टस्यतादृशसंयोगादेःसत्त्वेनोक्तदोषापत्तिरतोपत्रेति।अद्यभूतलेपटादेःतादृशसंयोगादिसत्त्वेनैतद्दोषापत्तिरतोपस्येति।अद्यभूतलेघटस्यका
लिकविशेषणतासत्त्वेनतद्दोषापत्तिरतःसंयोगादिरिति।तदधिकरणस्यतत्कालनिरूपिततन्निष्ठवृत्तित्वावच्छेदकतायांतत्कालावच्छिन्नतत्स्व
तियोगिकसंयोगादिमत्त्वंनियामकमितिफलितार्थः।एवंचावच्छेदकतायाअव्याप्यवृत्तित्वसिद्धिःस्थूलकालवृत्तितायामवांतरकालस्यावच्छे
दकत्वेकालिकसंबंधोपितंत्रं।नचैवेपरीत्यंशंक्यं।अतिप्रसक्तस्यानवच्छेदकत्वात्।महाघटोत्पत्तीति।द्वितीयक्षणप्रभृतिचनखंडघटोत्पत्त्या
पत्तिःसंभवतिद्रव्यस्यप्रतिबंधकत्वात्।महाघटेति।महाघटसामग्रीकालेकपालांतरसंयोगेनदलस्थान्महाघटकालेखंडघटस्यानुत्पत्तिरि

तिदुर्वचमत उत्तरे स्युक्तं तच्च संयोगेऽन्वेति। कपालांतरं द्रव्याभाववत्कपालं एवं चैककपालकघटप्रसंगवारणाय द्रव्याभाववत्कपालांतरघटि
तसामग्र्या अपेक्षणीयतया महाघटनाशकाले न घटोत्पत्तिः। क्लृप्तेति नियतपूर्ववर्त्तितायाः सामग्र्येऽपि नाशव्यक्तावन्यथासिद्धत्वमपि कं क
ल्प्यमित्यर्थः। एवं चेति अत्र चैवं धनसंयोगस्य धूमोत्पादप्रयोजकत्वात्तद्विशिष्टवह्निमत्त्वमस्त्येवेति आशंक्य स्वनिष्ठकारणतानियामकसंबंध
घटितसामानाधिकरण्यसंबंधेन प्रत्यासत्तिविशिष्टत्वस्योक्तत्वात्। अन्यथा स्वरूपसंबंधरूपस्योत्पत्तिप्रयोजकप्रत्यासत्त्यधिकरणे कालिक
संबंधेन द्रव्याभावस्य वृत्तेरुक्तदोषतादवस्थ्यापातादिति न समाधानं। उत्पत्तियोगितासंबंधेन प्रत्यासत्तिवैशिष्ट्यनिवेशात् संयोगानुत्पादकाले च
न संयोगविशिष्टवह्निमत्त्वमिति भावः। प्रकारांतरेणाव्यभिचारमाशंकते यद्विचेति। नांतरीयवह्निकस्य चरमकारणाधिकरणतायामपि स्वाधि
करणदेशावच्छिन्नो योऽन्योन्याभावस्तद्वत्क्षणावच्छिन्नत्वमस्त्येवान्योन्याभावस्यैकत्वादतोऽन्योन्याभावाधिकरणत्वे तादृशदेशावच्छिन्नत्वनिवेशः। यथा
श्रुतेऽपि वन्ह्यभावाधिकरणत्वे एव तन्निवेश्यं। तादृशक्षणवृत्तित्वोक्तेऽव्यभिचारतादवस्थ्यात्तदवच्छिन्नेति। क्षणत्वविशिष्टवृत्तित्वं क्षणत्वावच्छि
न्नाधिकरणताकत्वमिति गौरवात् न्व्यधिकरणेंधनादिरूपकारणाधिकरणताघटितसमुदायवारणाय क्षणतांतर्भावेण पर्याप्त्यवच्छेदकता
कत्वमुक्तं अवच्छेदकतासंबंधेन क्षणवृत्तित्वमपेक्ष्य लाघवं च। कारणमात्रेयावत्त्वोक्तौ द्रव्याभाववद्घटितयावत्कारणानामागंतुककपालादिनि
ष्ठकतिपयाधिकरणतासु तादृशक्षणावच्छिन्नतया व्यभिचार इत्यधिकरणतासमुदायनिवेशः। कारणीभूतोत्पत्तिप्रयोजकप्रत्यासत्तिविशिष्टत्वेय

र्मिस्यागः। वह्न्यादीत्यर्थः। धर्मोऽपि तद्रूपसंबंधत्वाभावश्च समुदायेऽस्य प्रयोजकेति। ननु धूमे प्रतियोगितादात्म्येन पर्वतादेर्हेतुत्वात् तत्संबंधावच्छिन्नसंबं
धितायाश्च तादृशलक्षणानवच्छिन्नत्वात् तदप्रसिद्धिरितो पदेति। विलक्षणादीति। तथा च वह्न्युत्पत्तिक्षणादेः तादृशवृत्तित्वविशिष्टवह्निमत्त्वाभा
वेनाप्रसिद्धिरतः वह्नीतरत्वमुक्तमिति भावः। अधिकरणतासमुदायमनिवेश्याह यद्वेति केचित्। यद्यदधिकरणेति वीप्साप्रयोजनमूह्यं। आगंतुकक
पालसंबंधस्यापीत्यपि नातस्याप्रयोजकत्वसूचनादुत्तरकल्पद्वयं व्यर्थमित्याशयेन यदि चेति। ननु वह्नेर्येन संबंधेन धूमं प्रति कारणत्वं प्रमि
मतं तेन संबंधेन तस्याधिकरणवृत्तित्वं निवेश्यं अन्यथा वह्नितत्समवधाने तरणावत्कारणाधिकरणक्षणस्य कालिकसंबंधेन यत्त्वाधिकरणवृ
त्तित्वं तद्वद्वह्निमदन्यतासंभवेन धूमेः प्रसिद्धेः। एवं च तस्य विशेषणतया निवेशो वह्न्युत्पत्तिद्वितीयक्षणोत्पत्तिकघटे व्यभिचारः तत्सामग्र्यास्ता
दृशवह्निमदन्यलक्षणवृत्तित्वात् तदुपलक्षणतया तन्निवेशनीयं। तथा च वह्नीतरत्वनिवेशनमावश्यकमिति चेन्नास्वसमानाधिकरणवह्निम
दन्यत्वाव्यवहितपूर्वक्षणाकाल्पत्वरूपस्य तादर्थ्ये विशेषणतया स्वसमानाधिकरणत्वनिवेशेन तादृशघटे व्यभिचारनिरासः संभवेन जन्यताया
मुपलक्षणतया निवेशेन वह्नीतरत्ववैयर्थ्यात्। न चैकाधिकरणवृत्तित्वविशिष्टस्यान्यसंबंधेनाधिकरणांतरवृत्तित्वमुपेयते। तथा च संयोगसं
बंधेन पर्वतादिवृत्तित्वविशिष्टवह्न्यादेः कालिकसंबंधेनोत्पन्नक्षणसत्त्वादप्रसिद्धिरिति विशेषणतया तन्निवेशेऽपि वह्नीतरत्वनिवेशनमावश्य
कमिति वाच्यं। तत्कालावच्छिन्नसंबंधांतरवृत्तित्वविशिष्टस्यैव तत्कालवृत्तित्वमिह तु संयोगावच्छिन्नवृत्तितस्य तत्कालेः सत्त्वेन तादृशविशिष्टवह्निम

ग.टी०
२७
27

न्ताभावादुपपादत्वात्।उभयत्रविशिष्टवह्निपर्याप्तानिवेशो गौरवादुपेक्षितः।क्षितवह्निपर्याप्तानिवेशपक्षीतरस्वनिवेशोऽपिल्पतत्र्याहेत्वभितिसामं तस्य इति
वह्नितच्छून्यत्ववदुत्पन्नघटस्तामग्रीमत्क्षणस्य समानाधिकरणवह्निमत्वे न व्यभिचारानवकाशात्।अत्र वदंति विपर्यया तु माने वह्न्यसमवहित
जन्ये घटे व्यभिचारवारणाय प्रकारांतरादूषकत्वमायेन तदन्यत्वं देयमित्यभिप्रायेण तत्सार्थकं अन्यथा द्रव्यत्वे साध्ये सत्वे व्यभिचारवारकं गुणाय जन्म
त्वमपि सज्येत तद्द्वाराद्ध्वनित्वे नैव तद्वारणासंभवादिति।स्वाधिकरणेति।न चैतत्क्षणे वह्न्यजन्ये वह्न्यभिधानाद्विजन्यधूमावयवकर्मणि व्यभिचार इति
वाच्यं।संयोगसंबंधेन स्वाधिकरणतायाः प्रवेशेन स्वपदेन कर्मोपादानासंभवात्।क्वचिदेतदर्थकः पाठः।एवं च तद्धूमावयवरूपे व्यभिचारः तद्धूमावय
वस्योत्क्रीत्या तद्धूमजनने व्यापारतया तदन्यएव वह्न्यसमवधानकालीनत्वादिसाध्यांशस्य यावदंतर्गतस्य तदवयवरूपस्य न वह्न्यसमवधानकालीनत्व
मिति समाहितं तत्स्वरसः।एवमपि पाकजन्यधूमावयवरूपव्यभिचारस्योक्तविवक्षामंतरेण दुर्वारत्वाच्च।यत्तु तद्वह्निजन्यधूमद्व्यणुकैकत्वे व्यभिचारः
।धूमद्व्यणुकस्य स्थूलधूमजनने व्यापारतया तदितरयावत्कारणस्य तत्रागभावपरमाण्वेकत्वादेर्वह्न्यसमवधानकालीनत्वादिति तदप्येतेन प्रत्यु
क्तं।एवं वह्निसमवधानपूर्वं चक्षुःसंयुक्तानां धूमत्रसरेण्वादीनां संयोगस्य प्रत्यक्षे व्यभिचारः तत्संयोगस्य वह्निसमवधाने न तदितरयावदंतर्गता ग.म०
नां संबंधिप्रत्यक्षादीनां वह्न्यसमवधानकालीनत्वादिसाध्यांशकायाः तत्समयोत्पत्तिकाले पुनरपि चक्षुस्त्रसरेणुसंयोगस्यैवोत्पादेन प्रत्यक्षोपगमाद्या २७
वदंतर्गतस्य तस्यैव वह्न्यसमवधानकालीनत्वं नास्तीति समाधीनं तादृशधनेयः प्राथमिकः तद्वह्निसंयोगः तदसमवहितसामग्र्यजन्यत्वं तत्संतार्थः।प्र

तस्य सामग्री च तादृशवह्निसंयोगासमवहितैवेति न व्यभिचारः। धूमध्वंसेनैकैकत्वव्यभिचारवारणाय व्याप्तिकत्वनिवेशः। एवं च पुनश्चक्षु
स्त्वसंनिकर्षेण संयोगो स्यादानुपगमेपि न क्षतिरिति समाधानांतरं च तद्वदेवा। आपाद्येति यद्यपि तत्र विशेषणत्वे धूमे प्राक्तदसिद्धेरेव आपाद्यव्य
तिरेकनिर्णयासंभवस्तद्द्वयेन तत्त्यागे चापादकविशेषणत्वमपि न घटते तथापि एतन्मते प्राक्तदसिद्धेरस्फूर्तिरेव। निर्व्याजयोजनताकेषा
नु तत्र विशेषणतात्पर्यमिति बोध्यं इत्यभिमानः। आपादकसंशयस्य तर्केऽनुकूलत्वेपि प्राक्तदसिद्धेरिति दूषणं पक्षतावच्छेदकानिर्णयप्र
संगपर्यवसायीति पक्षविशेषणं स्यात्प्रति विपर्ययेति यथा विपर्ययपर्यवसाने पक्षे आपादकशंकाया अनिवृत्तिः यथा च मूलशैथिल्येऽन्व
यव्यतिरेकितया आपादनानुकूलव्याप्तिग्राहकप्रमाणाप्रवृत्तिः। तथैव पक्षे आपाद्याबाधरूपेष्टापत्तौ बाधितापाद्यकत्वरूपत्वरूपहानिः।
आपाद्याभावेनापादकाभावासिद्धिस्वहेतोः स्वरूपासिद्धत्वादिति तर्कत्रयो दोषाः। तत्राद्यशंके आपाद्यशंकानात्मकत्वान्नेष्टापत्तीदृत्य
तआह तज्ज्ञानेति। इष्टापत्तिरूपेत्युपेक्ष्य तत्पर्यवसायिनी त्युक्तेः तज्जनकत्वलाभ इति भावः। तत्रेति उत्सन्नेऽदृत्यर्थः। एवं चैकधर्मितावच्छे
दककव्यापकशंकाधानसिद्धिः। वन्ह्यसमवहितत्वाजन्यत्वादेः विशेषाभावकूटत्वप्रस्फुरत्वापवन्ह्यसमवहितताहेतुकत्वेति। ननु विशेषाभावकू
टस्य सामान्याभावव्याप्यतायाम विवादादापादकशंकाविरोधितर्क एवांगीकार्य इत्यत आह तद्विरोधिन इति। अथ प्रस्तुत्यन्नः। मूलशैथिल्यशं
कं निरस्यति वन्ह्यसमवहितादिति। तद्विशिष्टे चेति। न चारोहार्पज्ञानीयधर्मितावच्छेदकविषयितायास्तद्विषयिताविरहप्रयोजकत्वादाहा

ग०टी
२८
28

र्यतादृशशंकाजनकेदितिवाच्यं। तस्याआपाद्यव्यतिरेकनिर्णयाप्रतिबंधकत्वात्तावत्तुतस्तुतादृशशंकाजनिकेच्छैवनकल्प्यमर्हतीतिय
थाश्रुतमेवसम्यक्। मूलशैथिल्यशंकापारिभाषिकोत्पत्तत्ववतिवन्ह्यहेतुकत्वशंका। धूमपदानुषंगेणाभिप्रायाभिमतव्यभिचारज्ञाननिर्वाह
मुपगम्य मूलशैथिल्यशंकापर्यवसानं पक्षेऽसत्त्वज्ञानस्याविरोधित्वाभिमानेनाशंकतेनचेति। निश्चितेइतिनिश्चयप्राग्व्यवहितोत्तरका
लीनत्वं शंकायाश्चयिन्न्हेतुकत्वं स्वत्वाव्यवहितप्राक्क्षणवृत्त्यनयासिद्धकान्यत्वं वाकोत्तरकालीननिश्चयमधिकृत्याहयदिचेति। ग्राह्यस
शयस्याप्रतिबंधकत्वेपिसंशयविषयविरुद्धकोटेर्नाभानंप्रतिबंधकासत्त्वात् अन्यथाकापिशंकायास्तर्कविरोधित्वंनस्यात्। इष्टापत्तिशंकेव।
आपाद्यस्यपक्षसत्त्वज्ञानफलकशंकेवाव्यापकत्वाभिमताभावव्याप्यत्वाभिमतयोः परस्परानुपरक्त विषयताकग्रहोनव्यभिचारग्रहः।
अन्यथासर्वत्रपक्षेआपादकशंकाआपाद्याभावनिर्णययोःसत्त्वान्मूलशैथिल्यस्यादोषतापत्तेरितिसिद्धांतमनुरुध्यदूषयतियतइति।
तर्हितयोःपरस्परोपरक्तविषयताकग्रहरूपव्यभिचारग्रहमादायग्रंथसंगमनंकार्यमित्याशंकायांस्मारयतितादृशेति। तादृशाभावआपा
द्याभावः। प्रागेवतद्विशिष्टेत्याकारकत्वशंकेवेत्यादिना। आपादकशंकाबाधकशंकायाअनुच्छेदनीयत्वमप्याहएवमिति। विनेवेति। अहेतु त०म० २८
कत्वशंकानधीनोपीत्यर्थः तामेवेति। अन्यथोच्छेद्याभावेनोच्छेदकीभूततर्कानुसरणवैयर्थ्यात् अलमिति। अहेतुकत्वशंकाविरासेतदधीना
वन्ह्यहेतुकत्वशंकानिरसिता। नचतावतातदनधीनायानिरस्तेतितर्कोच्छेदस्यावश्यंभावे अहेतुकत्वशंकानिराकरणवैयर्थ्यमित्यर्थः अ संभव

इति। तथा च व्याप्यव्यतिरेकनिश्चयविरोधित्वादिष्टापत्तिशंकात्वमिति भावः। सा चाप्याप्यसिद्धिश्च। त्वरूपेति। तन्मुख्यविशेष्यकज्ञान ^
स्यापि संग्रहार्थं। सहेतुकत्वं हेतुतानिरूपकत्वं। क्वचित्। अविरोध्यधिकरणेपि प्रतियोगि मुख्यविशेष्यकज्ञानसंग्रहार्थं अपि विति। सर्व
त्रैव सत्वमात्रे। इयं च शंका सर्वत्रैव हेतुताभावरूपव्याप्यशंकाद्वारा वह्नेर्धूमहेतुत्वशंकाजनिनी। सा च धूमनियतपूर्ववर्त्तित्वावच्छेदेन तदन्य
थासिद्धत्वशंकारूपेति। ततो वह्नेस्तादृशनियतपूर्ववर्त्तित्वविशिष्टान्यथासिद्धत्वसंकेति। यद्वा कार्यसामान्यहेतुतायामव्यत्तित्वशंकेव द्वा। मि
ति। तदीयेति कार्यत्वेन निवेशः सामान्यतः उत्पत्तेरित्युक्तेः अत्रासत्त्वात्तु ध्वनितस्वहेतोरभावशंकेऽसमव्याप्यानंअसत्वात्तेमानाभावात्।
अप्याप्यसिद्धिं परिहरन् सा प्रकारान्तरेण शंकासंगमनं शंकते येति। उत्पन्नतायामहेतुताभावानात्मकत्वेपि तत्र तद्व्यावर्त्तकत्वं अप्रव्याप
५५ पिर्वैन्नाहो स्वन्निमत्तयेति सहेतुकत्वेति उत्पन्नत्वज्ञानेपि सहेतुकत्वज्ञानं नास्तीत्यर्थः। तथा च यथा कार्यान्तरे उत्पन्नत्वमेव शंकाविरोधि तथा धूमे
पीति भावः। तौ [illegible] तद्व्यावर्त्तकतातान नियमः स्वचायिष्यते तन्मात्रेति एवं कारमंतर्भाव्यापत्समाधानाद्रणत्वादिति अस्यापि तदभावस्य
त्वादिनान्वयः। तन्मात्रजन्यत्वं वह्निभिन्नेतरजन्यत्वे सति वह्निभिन्नजन्यत्वं तत्र वह्निभिन्नेतरत्वे नवन्युपादानं शिरोवेष्टनन्यायग्रस्तविशेष्यां
शावेयर्थ्यं चेत्साशयवानाह वन्ह्यजन्यत्वे इति यथाश्रुतविशिष्टाभावकोटिकत्वेपि दुरुच्छेदकताप्रदर्शनाय पर्यवसितमाह इति। दुरुच्छेदत्वादिति।
तदुच्छेदोपगमे तर्कवैयर्थ्यप्रसंगात्। निवेशेति। तत्संभवे हि तच्छंकाया विशिष्टाभावव्याप्यसद्भावशंकासंपादकतयेष्टापत्तिपर्यवसानं घटते नान्य

ग॰टी॰
२९
29

प्येतिभावः। वन्ह्यसमवहितादितिवह्निशून्यत्वे साधिकरणदेशावच्छिन्नत्वलाभायाप्रविष्टत्वं जन्यत्वं उत्पन्नत्वं स्वाव्यवहितप्रा
क्क्षणकत्वमिति यावत्। एतादृशतर्कात्पूर्वमनुमातरि संभाव्यमानायास्तद्विरोधिशंकायास्तर्कान्निवृत्तिः तादृशतर्कप्रदर्शितादृशशंका
नत्स्वतिवं धकोभयप्रदर्शक मूलं व्याचष्टे मूले इति। इत्यादीत्यादिपदेन स्वपूर्वकालवृत्तित्वं ततः शंकाविरहकतर्केतरसकलतर्कलाभः न्यूनता
भंगाय। उत्पत्स्यमाने इति। एवत्। संभावनायामिति तथा चानुमातरि शंकायाः संभावनामात्रेनतु सेतिलब्धं कुतइत्याकांक्षायां सर्वत्रेत्यादि।
शंकायामिति विशेष्यपूरणं विशेष्यविशेषणपदयोर्व्युत्क्रमः शंकात्रये इत्यर्थः। तदभावापादकत्वमित्यनेन संबध्यते। स्वं वन्ह्यचपादिग्रहवि
शिष्टः पुरुषः। किंचिदुद्देश्यकोपायसाध्यकप्रवृत्तिः व्याघातो विरोध इत्याशयेनाह धूमादाविति। अगृहीतान्वयव्यतिरेकानुविधानस्य
पुंसस्तथाविधयत्नस्यानुदयात् द्विशेषणानुपादाने तत्प्रापादनपक्षतावच्छेदकं। तद्विशेषणविशिष्टपुरुष एव तादृशशंकायाः परानुपगतत्वा
दन्यथेष्टापत्तिः स्यात् अवच्छेदकावच्छेदेनापत्तिसंभव इतिचेत्तथापि एतद्विशेषणावद्धर्मिण्येव सामानाधिकरण्येनापाद्यव्यतिरेकनिर्णय
स्य प्रमात्वेन तस्यावश्यकत्वात्तर्कधर्मितावच्छेदकरूपेण विपर्ययानुमाने उद्देश्यतावच्छेदकतया शंकाविरहप्रयोजकत्वसिद्धेश्चान्नानुविरोधः
सहानवस्थानियमः सचशंकायांतदभावेनैयत्यमेव तस्य तदधीनेतात्पर्यमाह तदभावापादकत्वमिति। गृहीतेति ग्रहस्य पक्षतावच्छेद रा॰प्र॰ २९
कत्वार्थ। नतीयशंकायामूले नुक्ते त्वात्तत्स्यासत्त्वशंकायाविरहाप्रसंगलाभेन सर्वत्रेत्यसंगतं स्यात् अतः पूर्व्यति कार्यसामान्य इत्यादि। उपा

कुर्यादिसनेन

दानं च न प्रवृत्तिः पौनरुक्त्यादतो व्याचष्टे समवधानमिति। समवधानं स्थापनं। ईदृश क्रियाविशिष्टे वह्नावपि प्रवृत्तिः। ननु धूमार्थं वह्न्युपादानं निय
मतः कथं कुर्यादिति मूले धूमार्थत्वं धूमोद्देश्यकत्वं क्रियाविशेषणे द्वितीया। उपादानपदोत्तरद्वितीयायाः साध्यत्वमर्थः। अनुपपत्तिः कथं शब्दार्थः
।स्याभावापत्तिरिति यावत् तत्साध्यत्वार्थकृतावन्नयमः। नियमः समभिव्याहृतपदस्तावच्छेदकीभूतग्रहव्यापकत्वं धात्वर्थे एवान्वेति। एतच्चापाद्य
व्यतिरेकनिर्वाहार्थं समभिव्याहृतापादककस्याभावापत्तिविषयताद्दशग्रहव्यापकप्रवृत्तिमात्रनिमित्तकार्थः। तत्र चापादनाकारणाभाव विशेष्य
विशेषणाभावं व्यतस्यस्मतिवन्स्यादीति। तथा च मूले इति पदं पूरयित्वा व्याख्यानपदार्थैकदेशापन्नान्वयो बोध्यः। तेन विनापीति मूलमसंगतं
तं वह्निना विना धूमासंभवादित्यतः अप्रयोजकत्वशंकानिरासार्थं तया व्याचष्टे तदिति। कारणताग्रहस्येष्टसाधनताज्ञानविधया प्रवर्त्तकः। ए
तादृशापसार्शकाविरहं इत्यायतन्निर्वाहकतया तदुपादानस्पर्शकाप्रतिबंधकत्वं इत्यादितं न हि रणो ति तस्मादित्यादिना। आस्थीयत इति प्रमा
णाकथं तानि रासाय। ननु कार्यप्रयोजकताज्ञानादौ न प्रवृत्तिकारणत्वं दंड इति घटककारणता निर्वाहकानां संयोगभ्रमिकपालिकादिकपा
लद्वयसंयोगानां व्यापारत्वेपि प्रकृते कार्यप्रयोजकताविषयकग्रहणत्वेनेच्छासाधारण्यात् रूपेणाहेतुतया इच्छादीनां मध्यगानामतयात्वादित्य
तआह उपलक्षणमिति। कारणताभावेपि प्रयोजकतानपायादिति भावः। प्रवृत्तिकारणतादेः परिचायकतया प्रतिबंधकतावच्छेदकं रूपं दी
धितौ तद्वीये इत्युक्तं। अत्र धूमो वह्निप्रयोजक इति ज्ञानं शंकात्रयस्य निवर्त्तकं तत्तीयपक्षं कार्यं कार्यान्यथासिद्धं कार्यप्रयोजकमिति सामान्य

ग॰टी॰ ३० 30 तो भोजनादिकं तस्मादिप्रयोजकमिति कार्यान्तरे तज्ज्ञानमपि । मूले तस्यापेक्षितया भोजनादिप्रवृत्तिविरोधः तत्तीयशंकायामेवेत्याशयवाना
हव स्याद्याचिति । अग्रिमं कार्यमिति च विशिष्यधर्मिणि आवर्तकज्ञानस्य सामान्येशंकानिवर्तकत्वं सामान्यविशेषभावनिबंधनमिति तस्मादेः
कार्यत्वाभिधानं । तस्मादीति च प्रयोजकतानिश्चये तस्मादिकं प्रति अनन्यथासिद्धत्वनिश्चयकालीनत्वलाभायातेनान्यथासिद्धिशंकायाश्च पि
निरासः प्रयोजकत्वस्य कारणात्वरूपत्वे प्रथमं तन्निश्चयात्तर्कवैयर्थ्यमित्यत आह कारणत्वादन्यदिति । अन्यथासिद्धसाधारणं प्रयोजकत्व
स्य दर्शयति कारणेति । प्रथममिति तत्र प्रयोजके उपदर्शितप्रयोजकत्वग्रहस्य प्रयोजके वा तद्भावसंशयस्य वारणाय तत्पूर्ववर्तित्वादिव्यंज
कनिश्चयोपेक्षणीयः प्रवृत्तिः तर्कं विना तदसंभवादुन्निश्चेयपते स्यार्थः प्रत्यक्षतद्विति । वह्न्याभाववति धूमाभावलौकिकप्रत्यक्षसामग्र्यास्तत्र धूमव
त्ताग्रहविघटकत्वात् । एवं धूमतस्मादिरूपतत्तत्कार्ये अनन्यथासिद्धवह्निभोजनादिरूपतत्तत्कारणान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकवत्ता
निश्चयस्य कार्यसामान्ये हेतुकत्वशंकानिवर्तकत्वं तस्य तत्तत्कार्यकारणाद्यटितव्यभिचारशंकाविरोधितया कार्यनियतपूर्ववर्तित्वाभावस्य सामा
न्यतो व्यभिचारपर्यवसिततस्य शंकाविरोधित्वात् । प्रथमस्त्वक्रियापदस्य प्रवृत्तिपरतायां अग्रेतनमपीति अपिशब्दवैयर्थ्यमेव तस्य तदुपादानव्य रा॰म॰ ३०
जकत्वादित्यधिकारस्याभिन्नक्रमत्वं निवेद्यतद्बुद्धरति । अग्रेतनमपीति अग्रेतनं स्वक्रियापाप एव शंकाप्रतिबंधकत्वादिति मूलस्यं । अपिना तदुपा
दानपदसमुच्चयः । तदुपादानमेवेत्येवकारः तर्कस्य शंकाविरोधितावच्छेदार्थः । ननु प्रवृत्तस्याभावापत्तेः स्वक्रियामाघातशब्दार्थत्वे आपादना

कारजिज्ञासायां पदिहीत्यादि ग्रंथमुक्ता किं तच्छंका प्रतिबंधकमित्याकांक्षायां तस्मादित्यादिना प्रतिबंधकताव्यवस्थापनं संगच्छते। एतन्मते च
स्वक्रियाव्याघात इति व्यवस्थापनेय दिहीत्याद्युत्तरग्रंथोऽजिज्ञासाभिधानं इत्यत आह स्वक्रियाव्याघात इति। तथा च प्रमाणसहकारिणस्तर्कस्याभिधा
नेनोक्तरीत्या प्रवृत्तिप्रयोजकतद्रूपप्रमाणलाभः। स्वक्रियापक्षतावच्छेदकीकृत्यशंकानुत्पादसाध्यकप्रवृत्तिमत्त्वलिंगकानुमानं वा बोध्यं। ननु
स्वक्रियाव्याघात इत्यत एव स्वक्रियायाः प्रतिबंधकत्वलाभात्तस्मादित्यस्य पुनरुक्तत्वशंकां निराकर्तुमाह तस्मादिति। शंकायाः प्रतिबंधकत्वे प्रवृ
त्तिजनकत्वस्य तस्मात्पदलभ्यस्यान्वयादुपसंहारत्वं प्रथमतद्धाकं च प्रतीतेरेवेति। ननु उपसंहारे पक्षे साध्ये वैशिष्ट्यमात्रं बोधनीयं ननु पक्षभिन्ने
साध्यशून्यत्वमपीत्यत एवकारः व्यवस्यतीति एवकारश्चेति। तथा चोपसंहारार्थश्चायमबाधितत्वादिलाभसंग्राहकत्वेनाप्रतिबंधकत्वे पूर्वोक्तप्रवृ
त्त्यनुपपत्तिस्फोरकत्वेन वा व्यतिरेकमुदाहरणादिघटितमायकत्वावेदकत्वेन वा एवकारेणोपक्ष इति भावः। ननु तत्सत्त्वमेवेत्यसंगतं स्वक्रिया
पदस्योपादानं शब्दार्थत्वाभावादत आह सत्प्रधानपदार्थमिति दर्शितेति राजयातं गांगास्त्येवामीतु रंगमाइ तिवदिति दर्शयितुं तदुपादानेति पक्ष
इमित्यंताव्याहारो वा एकफलेच्छादीति स्वर्गेच्छादिजन्यप्रवृत्त्यावोदने च्छादेः स्वर्गसाधनताज्ञानादिजन्यप्रवृत्त्यावोदनसाधनताज्ञानादेरित्यर्थः
। तत्फलेति तत्फलोद्देश्यकत्वे सतीति तदुपायविषयकप्रवृत्तित्वं तत्फलेच्छा तदुपायविषयकतत्फलसाधनताज्ञानकार्यतावच्छेदकं। फलान्तरवि
षयकप्रवृत्तित्वं तत्फलेच्छा तदुपायविषयकतत्फलसाधनताज्ञानकार्यतावच्छेदकं। फलांतरविषयकतदुपायविषयकप्रवृत्तौ तत्फलोद्दे

ग० टी० स्यकौ वार्थान्तरविषयकप्रवृत्तौ व्यभिचारवारणाय दलद्वयं निरूप्यनिरूपकभावश्च । हिंसामुच्छेद्यत्वेन लक्षितत्वेन तत्संसर्गानवगाहित्वपर्यवसितं । प्रवृत्ते
३१ : फलांशे निर्विकल्पकरूपत्वोपगमं निरस्यति तत्फलेति । स्वर्गसाधनं पाकः ओदनसाधनं यागः इति भ्रमेण जायमानायामिच्छायां विषयफलद्व
यावगाहि समूहालंबनरूपो यः तद्द्वयविषयकप्रवृत्तौ स्वर्गोद्देश्यकत्वयागादिसाध्यकत्वयोः सत्त्वेन तत्पूर्वं यागः स्वर्गसाधनमिति विशेषेऽप्र
31 त्वेन व्यभिचार इत्यर्थः । नन्वेवमपि साधनतायाः कुतो विषयता संबंधाभावेन प्रकारविशेष्यभावेऽपि साध्योद्देश्यभावमुपपद्यते इत्यत आह नही
ति । साध्यतात्वविशेष्यतात्वे भिन्ने न तु साध्यताविशेष्यत्वे एवमुद्देश्यतात्वप्रकारतात्वे भिन्ने न तूद्देश्यत्वप्रकारत्वे इति भावः । अधिकमन्यत्र । एवं च त
ज्ज्ञानकोपायेच्छायामपि फलसाधनताविषयकत्वं बोध्यं नन्वेवं कृत्यादिरिति दूषणमसङ्गतं स्यात् तर्कपूर्वकृतेरेवासत्त्वादित्यत आह सार्वभौमनांत
र्कं पूर्वकृतिसद्भावेन तत्प्रतिबंधकतामतनिराकरणाभिप्रायकत्वेन तत्संगमपि तु माह परीक्षाकारस्त्विति । प्रतिबंधकीभूतप्रवृत्तेः तादृशका
र्यकारणाभावावगाहित्वसंपादनाय प्रथममिति निश्चयस्य तर्कानधीनत्वार्थमनंतरमित्यस्य तत्संबंधावच्छिन्नकार्यकारणाभावग्रह एव तर्का
पेक्षणात् । लाघवादिना दिप्रवृत्तेः शंकाविरोधितायां द्वारमुक्तं । वह्नीति उ सति संबंधो हेतुतावच्छेदकः वह्नीति तर्कोपयोगः । निश्चयार्थमिति । ई
दृशासामान्याधिकरण्यनिश्चये एव तद्व्यतिरेकासिद्धिनिश्चयो भवतीत्यर्थः । नान्यो ग्येति । प्रवृत्तिं विनैव तादृशकार्यकारणभावनिश्चयसंभवादिति रामं०
भावः । कृतिरमुक्तेरीत्या सामानाधिकरण्यप्रत्यासत्त्यनवच्छिन्नसाधनताविषयिणी बोध्या प्रमाणांतरेति मानाभावं व्यनक्ति कर्तुर्भूमो यदीत्या ३१

दिमूलमवच्छेदकावच्छेदेनापत्तिपरमित्यभिप्रेत्य दीधितौ यद्यपीत्याद्यं किंतु तद्वत्तापत्तिर्न तु वह्निशून्य इति। तथा चेति धूमत्वावच्छेदेन
वह्न्यन्वयव्यतिरेकानुविधायित्वानिश्चयासंभवे चेत्यर्थः धूमत्वसामानाधिकरण्येनैव वह्न्यन्वयव्यतिरेकानुविधायित्वस्य निश्चये तु शंकात्वे
पितस्य धूमत्वसामानाधिकरण्येन वह्निजन्यत्वसंशयानिवर्त्तकत्वमेवेति भावः वह्निजन्यतयाव्यापादकेन। तादृशसंशयेति। जन्यतातिप्र
सक्तेः स्वरूपसंबंधरूपावच्छेदकत्वस्यावर्त्तकत्वं तद्विरोधित्वं चानुपदं स्फुटं। उक्तानुपपत्त्यापादाह मणीति। तदेकदेशेन तत्सामानाधिकरण्येनातस्या
पादकस्य। तत्सामान्येन तद्धर्मावच्छेदेनानन्वस्तु धूमोपदीतिमूलं सामानाधिकरण्येनापत्तिपरं तत्रासत्ति सामानाधिकरण्येनावच्छेदकाव
च्छेदेन चापादकशंकोच्छेदसिद्धेरिति शंकां निराकरोति न चेति। अविरोधिविषयकनिश्चयादपि तर्कोपगमे क्वचित्तस्याहार्यतानस्यादि
त्याहात एवेति। मास्तु तर्कस्याहार्यतानियमः अस्तु वा तर्कस्यापादकाहार्यजन्यतया व्याप्यस्य विषयकत्वोपगमेनाहार्यतानिर्वाहः इत्यत उपष्टं
भकांतरमाह अत एव चेति। अवच्छेदकत्वस्येति। कपिशधूमत्वाद्यवच्छिन्नप्रतिबंधनविशेषाद्भव वह्नित्वादिनाहेतुत्वात्तादृशवह्नित्वादे
नार्णीत्वादेश्च विरोधभंगो बोध्यः। अवांतरधर्मे वैजात्यविशेषः तथा चोक्तसंशयस्य एव बाधनिश्चयप्रतिबंधकः। विरोधिशंकासत्त्वे धूमत्वावच्छेदेन
वह्निजन्यत्वशंकासत्त्वे। एवं च तद्धर्मावच्छेदेनाकार्यत्वशंकाविरहसत्त्वद्वच्छेदेन जन्यतानिश्चयोपगमे। क्वचिदपीति वह्नित्वावच्छेदेन तार्णाकार्यत्व
शंकाविरहदशायां तदवच्छेदेन तज्जन्यतानिश्चयानुत्पत्तेस्तार्णत्वावच्छेदेन तज्जन्यतानिश्चयोत्पत्तेश्चानुभवसिद्धत्वादिति भावः। व्यभिचारप

दंनअनुमितिसंगमात्मिविशेषियव्यभिचारपरंतस्यकार्यत्वव्यावर्त्तकत्वेनगृहीतस्यैवविशेषितयातथाविधानामप्रदर्शनीयत्वादतोव्याच
ष्टे प्रकृतकार्यत्वाभावेति। प्राक्। व्यभिचारनिर्णयात्प्राक्। क्रियेति क्रियाजन्यस्फलरस्येकजातिमधिकृत्य। अन्यूनानतिप्रसक्तत्वनि
यतेतिहेतुगर्भ। कार्यतायाअवच्छेदकघटकतयासिद्धंसत्वायाअवच्छेदकतायाः अनतिप्रसक्तत्वमात्रेनैयत्ये धूमभिन्नेपिसावर्त्तेतान्यूनवृ
त्तित्वनैयत्येसकलधूमेपिनवर्त्ततेत्यतउभयोपादानं। तुल्यन्यायेनवह्निजन्योनधूमइत्यादिनिश्चयानामपिप्रतिबंधकत्वंवक्ष्यतिग्राह्याभावा
वगाहितयाप्रतिबंधकतावादिमतमाह। कश्चित्विति। तत्प्रतिबध्यत्वासंभवादिति। तथाचवह्नित्वावच्छेदेनतत्तजन्यतासिद्धिर्दुर्वारैवस्यादिति
भावः। तदूहोपपत्तयेधूमत्वावच्छेदेनवह्निजन्यताग्रहोपपत्तये। अनुगतागुरुविशेषांतरानुपस्थितेर्नकारणत्वेनसाक्षादपेक्षणीयतातथा
सतिमणिमंत्रादिन्यायेनप्रतिबंधकताप्रसंगात्। किंतुप्रकृतधर्मधर्मिकावच्छेदकताग्रहेलाघवज्ञानरूपप्रतिबंधकाभावसहकारिसाहित्यात्तादृ
शेति। लाघवप्रतिसंधानेतितुप्रकृतधर्मेलाघवज्ञानं अप्रकृतधर्मेअवच्छेदकताग्रहविरोधितयोपयुज्यतेअग्निमंत्रन्यायादृष्टांततेजकृतयेति
भेदेनोक्तिः। प्रतिबंधादितिसामान्यधर्मधर्मिकावच्छेदकत्वग्रहप्रतिबंधादित्यर्थः। गौरवलाघवयोःपरस्परसापेक्षतयाएकग्रहगोचरता
।नन्यूपस्थितेः प्रतिबंधकत्वेद्रव्यत्वोपस्थितेस्तथात्ववारणायन्यूनवृत्तित्वमुपयुज्यतेलाघवज्ञानस्यतथात्वेतुनतदुपयोगइत्यतःतत्सोपयो राम० ३२
गंमुसादयति एताद्दशेतियथातार्णत्वस्यन्यूनवृत्तितयावह्नित्वेननतत्तजन्यताग्रहः। लाघवस्यवास्तवत्वार्थवास्तविकानांन्यूनवृत्तित्वादी

नां प्रवेशः। तेन द्रव्यत्वे धूमत्वन्यूनवृत्तित्वग्रहदशायां तदवच्छेदेन वह्निजन्यताग्रहोदयेपि धूमत्वावच्छेदेन तज्जन्यताग्रहप्रतिबंधेपि च न क्षतिः
। लाघवज्ञानस्य भ्रमत्वात्। नन्वेवमीदृशलाघवज्ञाने अनुगतत्वागुरुत्वयोर्नोपयोगः इत्यत आह एवमिति। शरीरगौरवं चानेकपदार्थघटितत्वं। कल्प
नीयतयेति। तदपेक्षया सामान्यधर्मावच्छिन्नाधिकरणवृत्तिजन्यताया एव लघुत्वादित्यर्थः एवमुक्तरीत्यापि अन्योऽवच्छेदकभेदस्यावच्छेद्यभेदनि ति
यतत्वात्। नन्वेवं तत्र धूमत्वावच्छेदेन तत्तद्वह्निकार्यताग्रहः तत्र कुतो न जायते इत्यत आह लाघवेति। गौरवज्ञानं प्राचां मते एव प्रतियोगितावच्छे
दकत्वग्रहे विरोधिकार्यताद्यवच्छेदकताग्रहे तु सर्वमतमिति बोध्यं। एतत्सामग्र्या अवच्छेदकावच्छेदेन कारणताग्रहेप्यपेक्षासत्त्वनापत्तत्र तत्रका
रणपदं कार्यतावच्छेदकत्वादिपरत्वपक्षमधिकृत्येदं। तदनुमितौ तु क्वचिल्लाघवज्ञानं गौरवज्ञानाद्यभावस्यापेक्षितो बोध्यः। अन्वयव्यतिरेकग्रहः कु
तापि नेत्यादिनाभिहितः। विशेषणानामिति प्रतीके विशेषधर्मावच्छेदेनेत्यादिना विवक्षितेनन स्वर्थद्वयग्रंथासंगतिः अयं च तदुपादानादन्य एवेति
बोध्यं। उक्तजन्यताभावशंका धूमत्वसामानाधिकरण्येन वह्निजन्यताभावशंका। कस्यचिदिति वह्न्यजन्यधूमाकल्पने लाघवमित्यत्राप्रसिद्धिवारणा
येदं तद्विवरणं कस्यचन धूमस्य तद्धूमान्यत्वादिघटितः। विशेषदर्शनं धूमे वन्ह्यकार्यवृत्तिधर्मवत्तानिश्चयः। स च धर्मो धूमत्वप्रकारकप्रमाविशेष्यत्वा
दिः। अवच्छेदकत्वाभावव्यावर्तकधर्मदर्शनं तु नोपपद्यते स्वरूपतो धूमत्वावगाहिकार्यत्वग्रहे केनचिद्रूपेण धूमत्वावगाहितद्ग्रहस्यानुत्तेजक
त्वात्। ननु नायं पुरुष इति भ्रमोत्तरं पुरुषत्वव्याप्यकरवत्तानिर्णये अयं पुरुष इति प्रत्यक्षनिश्चयो जायते तत्र प्रतिबंधकतायां विशेषदर्शनस्यानुत्ते

ग॰ टी॰ जकतयाप्रतिवध्यतावच्छेदककोटौ प्रसक्षान्यत्वनिवेशे आवश्यके ग्राह्याभावनिश्चयदशायां ग्राह्यप्रत्यक्षनिश्चयापत्तिर्दुर्वारैवेत्यत आह। अप्र
३३ मानंतरमिति। ननु लाघवस्य विपरीतकोटिव्यावर्त्तकत्वेन गृहीतस्य विरोधित्वे प्रसिद्धविशेषो दृष्टांत इति कथं संभवति लाघवानुसंधानस्य त
द्व्यावर्त्तकतानवगाहित्वादिति चेन्न। लाघवज्ञानं मणिमंत्रादिन्यायेन विशेषदर्शनं तु व्यावर्त्तकादिधर्मदर्शनमुद्र्येति भेदाद्दृष्टांतः अन्यथा विशेषद
33 र्शन विधयेत्येव ब्रूयात्। विशेषदर्शनस्योत्तेजकत्वे लाघवज्ञानमुत्तेजकं तस्य प्रतिबंधकत्वे तत्प्रतिबंधकमित्यावेदनाय दृष्टांतः। नन्वेवं यदि मूलम
वच्छेदकावच्छेदेनापत्तिपरं तदावच्छेदकावच्छेदेनावह्नेरित्यादिशंकायाः सामानाधिकरण्येनापाद्यव्यतिरेकनिर्णयविघटनद्वारा तर्कविरो
धित्वाभिधानसंगमनेऽपि द्वितीयशंकायास्तदसंगतिर्दुर्वारैव। यदि च सामानाधिकरण्येनापत्तिपरं तन्मूलं तदा तच्छंकायाः संगतावपि तत्रा
पेक्षणीयांतरानपेक्षणाद्यद्यपीत्यादिना तद्ग्रंथासंगतिः। न च सामानाधिकरण्येनापत्तिर्व्यर्थेति वाच्यं। द्वितीयशंकाभिधानसंगमनानुरोधेन
तस्यामेव मणिकाराभिप्रेतत्वस्यावक्तव्यत्वात्। उपाध्यायप्रभृतिभिस्तादृशापत्तौ धूमत्वावच्छेदेन वह्निकार्यताग्रहस्वीकाराद्दीधितिकृता मणिग्र
नापत्त्यात्तदौचित्याच्चेति मणिदीधित्योरेकवाक्यताभंगप्रसंग इत्याशंकां निरस्यन्नाह इदमत्रेति। ईदृशे इति तथा च धूमत्वसामानाधिकरण्येन वह्न्य
समवहितताजन्यत्वनिश्चयात्तदवच्छेदेनापादकवत्ताज्ञानसहितात्तदवच्छेदेनापत्त्यातदवच्छेदेनापादकशंकानिरासात् लाघवज्ञानेन तत्सामानाधि गम॰
करण्येनापादकशंकाया अकिंचित्करत्वात्सोऽनापेक्षणीयांतरवत्त्वात् धूमत्वव्यापकसामान्यधर्मावच्छेदेन वह्निजन्यताग्रहो जायते इति तादृशस्थलाभिप्रा ३३

वद्वृत्तित्वत्वनिष्ठप्रतियोगिविशेषणतातापन्नीपावच्छेदकताभिन्नसमानाधिकरणधर्मनिष्ठावच्छेदकताकान्यतोपादानादेवान्यतराभावनिरासा-
त्, तद्वृत्तित्वनञ्द्वयादिसार्थक्याच्च। विशेषणताप्रकारत्वैयर्थ्यमेवास्वरसः। साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगित्वसूचकं वह्निपदमिति मतं क-
दाचयति साध्यतेति। तथा सति घटरूपद्रव्यमेवोत्कीर्त्तयेत्। उपेक्षणमिति। प्रतियोगिविशेषणतास्याव्यवच्छेदकत्वेन रूपपर्याप्तावच्छेदकत्वनिवेश-
स्य कूटघटितेव कृत्स्नत्वात्। अशक्यत्वादिति। तथा च ताद्दृशप्रतीकेन तथाऽवोधनान्महानसवृत्तित्वेनेति प्रकाराभावप्रकमिति। वृत्तित्वमात्रमि-
ति। साध्यसामानाधिकरण्यपर्यन्तनिवेशव्यवच्छेदाय मात्रपदं। पं त्विदमसंगतं धूमवान् अयोगोलकानुयोगिकत्वविशिष्टसंयोगेन वह्नेरित्या-
दौ विरुद्धे साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वात्तद्विपक्षावृत्त्यभावाधिकरणतत्तद्विपक्षनिरूपितहेतुताघटकसंबंधावच्छिन्न-
वृत्तित्वत्वावच्छिन्नाभावस्य ताद्दृशहेतुताघटकसंबंधावच्छिन्नवृत्तिमद्वृत्तेरप्रसिद्धतया व्यधिकरणधर्मावच्छिन्नाभावसत्त्वादिति साध्यसामाना-
धिकरण्यपर्यन्तावश्यकत्वात्। वस्तुतस्तु तत्पर्यन्तानुपादाने समवायेन गोत्वादिसाध्यके कालिकसंबंधेन महाकालवृत्तित्वविशिष्टघटादिहेतौ वि-
रुद्धे साध्यव्यापकतावच्छेदकीभूततत्तद्घटादिवृत्तित्वावच्छिन्नाभावाधिकरणतत्तद्घटादिवृत्तित्वाभावस्य महाकालमात्रवृत्तिहेतौ सत्त्वादतिव्याप्ति-
रिति। एवं महाकालावृत्तिमान् महाकालान्यो वा खंडकालान्यवृत्तित्वविशिष्टघटादिसादौ विरुद्धेऽतिव्याप्तिवारणमपि तत्स्थलं बोध्यं॥ ७॥ ॥
इति कूटाघटितलक्षणम्॥ ॥

पत्रे २९

श्लोक
१५००